श्रीमते रामानुजाय नमः ॥ अशेषचिदचिद्वस्तुशेषिणे शेषशायिने निर्मलानन्तकल्याणनिधये विष्णवे नमः १ परं ब्रह्मैवाज्ञं
भ्रमपरिगतं संसरति तत्परोपाध्यालीढं विवशमशुभस्यास्पदमिति श्रुतिन्यायापेतं जगति विततं मोहनमिदं तमो येना
पास्तं स हि विजयते यामुनमुनिः २ अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोयमर्थः जीवपरमात्मयाथात्म्य
ज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थः प्रियस्तत्प्राप्तिफलः ॥
अस्य जीवात्मनोनाद्यविद्यासञ्चितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्त
दात्माभिमानजनितावर्जनीयभवभयविध्वंसनाय देहातिरिक्तात्मस्वरूपतत्स्वभावतदन्तर्यामिपरमात्मस्वरूपतत्स्वभा
वतदुपासनतत्फलभूतात्मस्वरूपाविर्भावपूर्वकानवधिकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातं तत्त्व
मसि अयमात्मा ब्रह्म य आत्मनि तिष्ठन्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मा
न्तर्याम्यमृतः एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन
दानेन तपसानाशकेन ब्रह्मविदाप्नोति परं तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत इत्यादिकं जीवात्मनः स्व
रूपं देवमनुष्यादिप्रकृतिपरिणामविशेषरूपनानाविधभेदरहितं ज्ञानानन्दैकगुणं तस्यैतस्य कर्मकृतदेवादिभेदे विध्वस्ते
स्वरूपभेदो वाचामगोचरः स्वसंवेद्यः ज्ञानस्वरूपमित्येतावदेव निर्देश्यं तच्च सर्वेषामात्मनां समानं एवंविधचिदचि

नरराजनाथ विद्या ब्रह्मजीवेनस्व
कर्मद्वारा स्वं दृष्टं नारं शरीरं तद्दे
कप्रयत्नं प्रवेशस्थानं यस्य स
नारायणः॥ पद्म तथा च स्वयं
परमपुरुषस्य तद्विस्पष्ट
स्य वृजनेन प्रयत्नं तस्य ताः
पूर्वं तेन नारायणः स्मृतः॥
तद्विस्पष्ट यत् पुरुषा लो
केन लोकेति कीर्त्यते॥

विद्याकोद्वैतग्रंथः

वेदान्तसंग्रह

कृत

के.सा.
२

ल्य २

बोधयामास तं वर्णयन्तः स्वाभाविकनिरतिशयापरिमितोदारगुणसागरं ब्रह्मैव सुरनरतिर्यक्स्थावरनारकिस्वर्ग्यपवर्गिचेतने
षु स्वभावतो विलक्षणमविलक्षणं च वियदादिनानाविधमलरूपेण परिणाममास्थाय देचेति प्रस्तवतिषु नेतत्र प्रथमपक्षमभ्यु
पर्यर्थपर्यालोचनया ऽद्वष्यारुरान्यैषाज्ञदाह इति प्रकृतपरामर्शी न च श्रुतावगताः स्वसंकेतजगदुदयविलयादयः तेद्व
तवङ्कस्यां प्रजायेयेत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिभिः पदैः प्रतिपादिताः तत्संबंधितया
प्रकरणान्तरनिर्दिष्टः सर्वज्ञता सर्वशक्तित्व सर्वेश्वरत्व सर्वप्रकाशसमाभ्यधिकनिवृत्ति सत्यकामत्व सत्यसंकल्पत्व सर्वावभासकत्वा
द्यनवधिकातिशयासंख्येयकल्याणगुणगणोपहतपाप्मत्वाद्यनेकधा समवगतनिखिलादोषता च सर्वं तस्मिन्नेव विहन्यते
श्रयस्मात् उपक्रमे एकविज्ञानेन सर्वविज्ञानमुखेन कारणस्यैव सत्यतां प्रतिज्ञाय तस्य कारणभूतस्यैव सत्यतां विकारजात
स्यासत्यतां मृद्दृष्टान्तेन दर्शयित्वा सत्सम्भूतस्य ब्रह्मणः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सजातीयविजातीयनिखिलभे
दनिरसनेन निर्विशेषतैव प्रतिपादिता एतच्छोधकानि प्रकरणान्तरगतान्यपि सत्यं ज्ञानमनन्तं ब्रह्म निष्कलं निष्क्रियं निर्गु
णं निरंजनं विज्ञानमात्रमित्यादीनि सर्वविशेषप्रत्यनीकैकाकारतां बोधयन्ति न चैकाकारतावबोधने पदानां पर्यायता एकत्वे पि वस्तु
नः सर्वविज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञानमसत्याभावान्न सेत्स्यति सत्यमिथ्यात्वयोरेकेना प्रधानैकैवोपपत्तेरेकविज्ञानेन सर्ववि
ज्ञानप्रतिज्ञा सर्वस्य तदात्मकत्वेनैव सत्त्वेन सिध्यति अयमर्थः श्वेतकेतुं प्रत्याह स्तब्धोस्युत तमादेशमप्राक्ष्य इति परिपृष्टवल
क्ष्यते तानाचार्यान्प्रति तमप्यादेशं पृष्टवानसीति आदिश्यतेऽनेनेत्यादेशः आदेशः प्रशासनं एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्या

२

त्मकप्रपंचस्योद्भवस्थितिप्रलयसंसारनिवर्त्तनैकहेतुभूतः समस्तहेयप्रत्यनीकतयानन्तकल्याणैकतानतया च स्वेतर
समस्तवस्तुविलक्षणस्वरूपोऽनवधिकातिशयासंख्येयकल्याणगुणगणः सर्वात्मा परंब्रह्म परंज्योतिः परतत्त्वं परमात्मा सदस
दादिशब्दभेदैर्निखिलवेदान्तवेद्यो भगवान्नारायणः पुरुषोत्तम इत्यन्तर्यामिस्वरूपं अस्य च वैभवप्रतिपादनपराः श्रुतयः
स्वेतरसमस्तचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनं तच्छक्तितदंशतद्विभूतितद्रूपतच्छरीरतत्तनुप्रभृतिभिः शब्दैस्त
त्सामानाधिकरण्येन च प्रतिपादयन्ति तस्य वैभवप्रतिपादनपराणामेषां सामानाधिकरण्यादीनां विवरणे प्रवृत्ताः के
चन निर्विशेषज्ञानमात्रमेव ब्रह्म तच्च नित्यमुक्तस्वप्रकाशस्वभावमपि [illegible] तत्त्वमस्यादिसामानाधिकरण्यावगतजी
वैक्यं ब्रह्मैवाज्ञं बध्यते मुच्यते च निर्विशेषचिन्मात्रातिरेकीश्वरेशितव्याद्यनन्तविकल्परूपं कृत्स्नं जगन्मिथ्या कश्चिद्बद्धः कश्चि
न्मुक्त इतीयमपि अवस्था न विद्यते इतः पूर्वं केचिन्मुक्ता इत्ययमर्थो मिथ्या एकमेव शरीरं जीववत् निर्जीवानीतराणि शरीराणि
तच्छरीरं किमिति न व्यवस्थितं आचार्यो ज्ञानोपदेष्टा मिथ्या शास्त्रं च मिथ्या शास्त्रप्रमाता च मिथ्या शास्त्रजन्यं ज्ञानं च मिथ्या
एतत्सर्वं मिथ्याभूतेनैव शास्त्रेणावगम्यते इति वर्णयन्ति अपरे त्वपहतपाप्मत्वादिसमस्तकल्याणगुणोपेतमपि ब्रह्मैवैतावबो
धेनेन केनचिदुपाधिविशेषेण संबद्धं बध्यते मुच्यते च नानाविधमलस्वरूपपरिणामास्पदं चेति व्यवस्थिताः अन्ये पुनरैक्याव

ईशितव्यं

नानासंस्थानावस्थारूपविकारापन्नानामनामधेयमपि मृत्तिकासंस्थानविशेषत्वान्मृद्रूपमेवेति व्यवस्थितं न वस्त्वन्तरमिति
यथा मृत्पिंडविज्ञानेन तत्संस्थानविशेषरूपघटशरावादिसर्वविज्ञानमेवमत्रेत्यर्थः ततः कृत्स्नस्य जगतः परब्रह्मैककार
णतामजानन् पुत्रः पृच्छति भगवंस्त्वमेवैतद्ब्रवीत्विति ततस्सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वकारणमित्युपदिशन् सदेव सोम्ये सदे
व सोम्येदमग्र आसीत् एकमेवाद्वितीयमित्यत्रेदमिति जगन्निर्दिष्टं अग्र इति च सृष्टेः पूर्वकालः तस्मिन्काले जगतः
सदात्मकता सदेवेति प्रतिपाद्यते तस्य सृष्टिकाले नामरूपविशिष्टमिति कृत्वा एकमेवेति सदापन्नस्य जगतस्तदानीमविभक्तना
मरूपतां प्रतिपाद्यते तत्प्रतिपादनेनैव सतो जगदुपादानत्वं प्रतिपादितमिति स्वातिरिक्तनिमित्तकारणमद्वितीयपदेन
प्रतिषिद्धं तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतमित्यादौ तदेव प्रकाशितं च जगदुपादानमिति हृदि निधाय इदानीमव्यक्तं स्वयमेव जग
दुपादानं जगन्निमित्तं च सत् तदैक्षत बहु स्यां प्रजायेयेति तदेतच्छब्दवाच्यं परं ब्रह्म सर्वज्ञं सर्वशक्ति सत्यसंकल्पमवाप्तस
१५ मस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेणाहमेव बहु स्यां तदर्थं प्रजायेयेति स्वयमेव संकल्प्य स्वांशैकदेशाद्वे
वियदादिभूतानि सृष्ट्वा पुनरपि सैव सच्छब्दाभिहिता परा देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्र
विश्य नामरूपे व्याकरवाणीति अनेन जीवेनात्मनेति जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य ब्रह्मात्मकजीवानुप्रवेशाद्धि कृत्स्नस्या
चिद्वस्तुनः पदार्थत्वं एवंभूतस्यैव सर्वस्य वस्तुनो नामभाक्त्वमिति च दर्शयति एतदुक्तं भवति जीवात्मानुप्रवेशे तथाप्रका
रत्वाद्ब्रह्मात्मकः यस्यात्मा शरीरमिति श्रुत्यन्तरात् एवंभूतस्य जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यादिसंस्थानानि वस्तूनीति
मा

चेद्यमसौ विधत्ते नित्यष्वत इत्यादिभिरैकार्थ्यात् तथा च मानवं वचः प्रशासितारं सर्वेषामित्यादि॥ अथाप्येकमेवेति जगदुपादानता
प्रतिपाद्यते अतस्तं प्रशासितारं जगदुपादानभूतमपि पृष्टवानसि येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं वि
ज्ञातं भवति इत्युक्तं स्यात् निखिलजगदुदयविभवविलयादिकारणभूतं सर्वज्ञं सत्यकामं सत्यसंकल्पं त्वा प्रपादमितोप
रगुणसागरं किं ब्रह्म त्वया श्रुतमिति हार्दो भावः तस्य निखिलकारणतयाक्कारणमेव नानासंस्थानविशेषसंस्थितं कार्य
मित्युच्यते इति कारणभूतस्य सूक्ष्मचिदचिद्वस्तुशरीरकब्रह्मविज्ञानेन कार्यभूतमखिलं जगद्विज्ञातं भवतीति हृदि निधाय ये
नाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति पुत्रे प्रतिबद्धवान् पिता तदेतत्सकलस्य वस्तुजातस्यैककारणत्वं पि
तृहृदि निहितमजानन् पुत्रः परस्परविलक्षणेषु वस्तुष्वन्यस्य विज्ञानेन तदन्यविज्ञानमसंभावमानतोऽकुर्वापरिचोद्य
ति कथं नु भगवः स आदेशो भवतीति परिचोदितः पुनस्तदेव हृदि निहितं ज्ञानानन्दामलत्वैकस्वरूपं परं ब्रह्म माहात्म्यं सत्यसंकल्प पा८
त्वमिश्रैरनवधिकातिशयासंख्येयकल्याणगुणगणैर्जुष्टमविकारस्वरूपं परं ब्रह्मैव नामरूपविभागानर्हसूक्ष्मचिदचि
पं३ द्वस्तुशरीरं स्वलीलयैव स्वसंकल्पेनानन्तविचित्रस्थिरचरस्वरूपजगत्संस्थानं स्वांशेनावस्थितमिति तज्ज्ञानेनास्य निखिल
स्य ज्ञाततां ब्रुवन् लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाह यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्या
त् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारार्हस्त्वाय घटशरावादि

स्या१

ति सत आत्मान्तर्याम्यमृत इति च अनेन जीवेनात्मनेति इदमेवाह यत इति पूर्वमेवोक्तं अतः सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वात् सर्व
प्रकारं सर्वशब्दैर्ब्रह्मैवाभिधीयते तत्त्वमसीति सामानाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैवाभिहितं एवमभिहिते स
त्ययमर्थो ज्ञायते त्वमिति यः पूर्वं देहाद्विविक्ततया प्रतीतः स परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः पृथक्
स्थितिप्रवृत्त्यनर्हः अतस्त्वमिति त्वत्प्रकारविशिष्टं त्वदन्तर्यामिणमेवाचष्टे इति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा
णीति ब्रह्मात्मकतयैव जीवस्य शरीरिणः स्वनामभाक्त्वात् तत्त्वमिति सामानाधिकरण्यप्रवृत्तयोर्द्वयोरपि पदयोर्ब्रह्मैव वाच्यं
तत्र च तत्पदं जगत्कारणभूतं सकलकल्याणगुणगणाकरं निरवद्यं निर्विकारमाचष्टे त्वमिति च तदेव ब्रह्म जीवान्तर्यामिरू
पेण सशरीरजीवप्रकारकमाचष्टे तदेवं प्रवृत्तिनिमित्तभेदेनैकस्मिन् ब्रह्मण्येव तत्त्वमिति द्वयोः पदयोर्वृत्तिरुक्ता ब्रह्मणो निरव
द्यत्वनिर्विकारत्वसर्वकल्याणगुणाकरत्वजगत्कारणत्वं चाबाधितं अश्रुतवेदान्ताः पुरुषाः सर्वे पदार्थाः सर्वे जीवात्मानश्च ब्र
ह्मात्मका इति न पश्यन्ति सर्वशब्दानां च केवलेषु तत्तत्पदार्थेषु वाच्यैकदेशेषु वाच्यपर्यवसानं मन्यन्ते इदानीं वेदान्तवाक्यश्र
वणेन ब्रह्मकार्यतया तदन्तर्यामितया च सर्वस्य ब्रह्मात्मकत्वं सर्वशब्दानां तत्तत्प्रकारसंस्थितब्रह्मवाचित्वं च जानन्ति नन्वेवं गवा
दिशब्दानां तत्तत्पदार्थवाचितया व्युत्पत्तिर्बाधिता स्यात् नैवं सर्वशब्दाः अचिज्जीवविशिष्टपरमात्मनो वाचका इत्युक्तं नामरूपे व्याकर
वाणीत्यत्र लौकिकाः पुरुषाः शब्दं व्याहरन्तः शब्दवाच्यप्रधानांशस्य परमात्मनः प्रमहा अपरिछेदत्वात् वाच्यैकदेशभूते वाच्य

मं२

ब्रह्मात्मकानि तानि सर्वाणि अतो देवो मनुष्यो यक्षो राक्षसः पशुर्मृगः पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पट इत्यादयः स
र्वे प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धाः शब्दा लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानः वस्तुनो मुखेन तत्तदभि कें३
मानि जीव तदन्तर्यामि परमात्मपर्यन्तस्य संघातस्यैव वाचकाः इति एवं समस्तचिदचिदात्मकप्रपंचस्य सदुपादानतासन्निमि
त्ततां सदाधारतां नियाम्यतां शेषत्वादि सर्वं विस्तरेण प्रतिपाद्य कार्यकारणभावादिभिरेवैतदात्म्यमिदं सर्वं तत्सत्यमिति
कृत्स्नस्य जगतो ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्य कृत्स्नस्य जगतः स एवात्मा कृत्स्नं जगत्तस्य शरीरं तस्मात्त्वं शब्दवाच्यम
पि जीवप्रकारं ब्रह्मैवेति सर्वस्य ब्रह्मात्मकत्वं प्रतिज्ञातं तत्त्वमसीत्युपसंहृतं तेन एतदुक्तं भवति ऐतदात्म्यमिदं सर्वमिति चेतनाचे
तनप्रपंचमिदं सर्वमिति निर्दिश्य तस्य प्रपंचस्यैष आत्मेति प्रतिपाद्य तेन प्रपंचोद्देशेन ब्रह्मात्मकत्वं प्रतिपादितमित्यर्थः नहीदं ब्र
ह्मात्मकत्वं किमात्मशरीरभावेन उत स्वरूपेणेति विवेचनीयं स्वरूपेणेति चेत् ब्रह्मणः सत्यसंकल्पादयः तदैक्षत बहु स्यां प्रजा
येयेत्युपक्रमावगता बाधिता भवन्ति शरीरात्मभावेन चेत् तदात्मकत्वं श्रुत्यन्तराद्विशेषतोऽवगतं अन्तःप्रविष्टः शास्ता ज
नानां सर्वात्मेति प्रशासितृत्वरूपात्मत्वेन सर्वेषां जनानां अन्तःप्रविष्टः अतः सर्वात्मा सर्वेषां जनानामात्मा सर्वं चास्य शरीरमि
ति विशेषतो ज्ञायते ब्रह्मात्मकत्वं य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं यः आत्मानमन्तरो यमय

त्पदयोः स्वार्थप्रहाणेन निर्विशेषवस्तुस्वरूपोपस्थापनपरत्वेऽमुख्यार्थपरित्यागएवं नन्वेकेतात्पर्यानिश्चयात्लक्षणादोषः सोयंदे
वदत्त इति वाक्यवत्सोयमित्यत्र तच्छब्देन देशान्तरकालान्तरसंबंधी पुरुषः प्रतीयते अयमितिसन्निहितदेशवर्त्तमानकालसंबं
धीतयोः सामानाधिकरण्येनैकं प्रतीयते तत्रैकस्ययुगपद्विरुद्धदेशकालसंबंधितयाप्रतीतिर्नघटत इति द्वयोरपिपदयोः स्वरूपमा
त्रोपस्थापनपरत्वे स्वरूपस्यचैक्यं प्रतिपाद्यत इति चेन्नैतदेवं सोयंदेवदत्त इत्यत्रापिलक्षणांगंचौनविनाते विरोधाभावात्
एकस्यभूतवर्त्तमानक्रियाद्वयसंबन्धोनविरुद्धः देशान्तरस्थितिर्भूतासन्निहितदेशस्थितिर्वर्त्ततेऽतोभूतवर्त्तमानक्रियाद्व
यसंबंधित्वेनैक्यप्रतिपादनमविरुद्धं देशद्वयविरोधश्च कालभेदेनपरिहृतः लक्षणायामपितद्द्वयोरपिपदयोर्लक्षणासमा
श्रयणेएकैनैवलक्षितेनविरोधपरिहारात् लक्षणाभावएवोक्तः देशान्तरसंबंधितयाभूततस्यैववाऽत्रदेशसंबंधितयावर्त्तमान
त्वाविरोधात् एवमत्रापिजगत्कारणभूतस्यैवपरस्यब्रह्मणोजीवान्तर्यामित्वमजीवात्मत्वमविरुद्धमितिप्रतिपादितंयथा
भूतयोरेवपदयोरैक्यंसामानाधिकरण्येनप्रतीयतेतत्परित्यागेनस्वरूपमात्रैक्यंनसामानाधिकरण्यार्थः भिन्नप्रवृत्तिनिमित्ता
नांशब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति हि तद्विदः तथोभूतयोरैक्यमुपपादितमस्माभिः उपक्रमविरोधश्चोपसं
हारपदेनवाक्यतात्पर्यनिश्चयश्चनघटते उपक्रमेहितदैक्षतबहुस्यामित्यादिनासत्यसंकल्पत्वंजगदेककारणत्वमयुक्तंतद्विरो
धितात्विद्याश्रयत्वाद्ब्रह्मणः अपिचार्थभेदतत्संसर्गविशेषबोधनस्वभावानांपदवाक्यस्वरूपतालक्षणप्रमाणभावस्यशब्दस्यनिर्विशे
षवस्तुबोधनासामर्थ्यान्निर्विशेषवस्तुनिशब्देनप्रमाणंनिर्विशेषइत्याहिशब्दास्तुकेनचिद्विशेषेणविशिष्टतयावगतस्यवस्तुनो

समाप्तिं मन्यन्ते वेदान्तश्रवणेन च समुत्पत्तिः पूर्य्यन्ते एवमेव वैदिकाः सर्वे शब्दाः परमात्मपर्य्यन्ता न्तस्वार्थान् बोधयन्तीति वैदिका एवं सर्वे शब्दा वि
दादेवोऽस्य परेण ब्रह्मणा सर्वपदार्थान् पूर्ववत्सृष्ट्वा तेषु परमात्मपर्य्यन्तेषु पूर्ववन्नामतया प्रयुङ्क्ते तदाह मनुः सर्वेषां तु स नामा
नि कर्म्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इति संस्थाः संस्थानानि रूपाणीति यावत् आह च भग
वान्पराशरः नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनं वेदशब्देभ्य एवादौ देवादीनां चकार सः इति श्रुतिश्च सूर्याचन्द्रमसौ धाता
यथापूर्वमकल्पयदिति सूर्य्यादीन् पूर्ववत्परिकल्प्य नामानि च पूर्ववच्चकारेत्यर्थः एवं जगद्ब्रह्मणोरनन्यत्वं प्रपञ्चितं ते
नैकेन ज्ञातेन सर्वस्य ज्ञाततोपपादिता भवति सर्वस्य ब्रह्मकार्यत्वप्रतिपादनेन तदात्मतयैव सत्यत्वं नान्यथेति तत्त्वमसि सुके
यथाहृष्टोत्सर्वस्य महिकारस्य मृदात्मनैव सत्यत्वं बोधकवाक्यान्यपि निरवद्यं सर्वकल्याणगुणाकरं ब्रह्म बोधयन्ति सर्वप्रत्यनी
काकारतावोधनेपि तत्तन्न्यूनीकृतावाभेदस्य वर्जनीयत्वान्न निर्विशेषवस्तुसिद्धिः ननु च ज्ञानमात्रं ब्रह्मेति प्रतिपादितेन निर्विशे
षज्ञानमात्रं ब्रह्मेति निश्चीयते मैवं स्वरूपनिरूपकधर्म्मशब्दा हि धर्म्ममुखेन स्वरूपमपि प्रतिपादयन्ति गवादिशब्दवत् तदाह सू
त्रकारः तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति यावदात्मभावित्वाच्च न दोषः इति ज्ञानेन धर्म्मेण स्वरूपमपि निरूपि
तं न ज्ञानमात्रं ब्रह्मेति कथमिदमवगम्यते इति चेत् नयः सर्वज्ञः सर्ववित् इत्यादिश्रुतेः परास्य शक्तिर्विविधैव श्रूयते स्वाभा
विकी ज्ञानबलक्रिया च विज्ञातारमरे केन विजानीयादित्यादिश्रुतिशतसमधिगतमिदं ज्ञानस्य धर्म्ममात्रत्वात् धर्म्ममात्रत्वे
कस्य वस्तुत्वप्रतिपादनानुपपत्तेश्च अतः सत्यज्ञानादिपदानि स्वार्थभूतज्ञानादिविशिष्टमेव ब्रह्म प्रतिपादयन्तीति तत्त्वमिति ह्ययार
हा

वे.सा.
६

प्रत्यावगतमिति द्वितीयादि = १

निष्प्रतयानेकवस्तुविशेषणत्वं द्वितीयादि [illegible] विकल्पका उच्यते अतएवैकस्यपदार्थस्याभिन्नाभिन्नरूपेण द्व्यात्मकत्वं विरुद्धं मत्सुले
संस्थानस्य संस्थानिनः प्रकार [illegible] प्रकारत्वादेव पृथक् स्थित्यनर्हत्वं [illegible] ले भेदाभेदैन द्व्यात्मकत्वसिद्धिः अपिचनिर्विशेष
वस्तुवादिनाच्च ये प्रकारा वस्तुनितदुपस्थापकविशेषाः [illegible] इति [illegible] इति वक्तव्यं वाचारंभणं विकारो ना
मधेयं मृत्तिकेत्येव सत्यमिति विकार नामधेयं [illegible] वाचारंभणमात्रत्वात् यत्तु प्रकारतयोपलक्ष्यते वस्तुमात्रं तदेव सत्यमिदं सत्यमिति ये
6 श्रुतिवदती [illegible] न्नेतदुपपद्यते एकस्मिन्विज्ञाते सर्वं विज्ञातं भवतीति प्रतिज्ञाते अन्यस्यान्यासंभवं मन्वानस्यैव वस्तुविकारत्वं [illegible] विशेषेण
पारमार्थि [illegible] नव नानारूपमवस्थितं चेत् तत्रैकस्मिन्विज्ञाते तस्मात् भिन्नलक्षणं संस्थानान्तरमपि तदेव वस्तिति तत्र दृष्टांतीय निर्दिष्टेन नावक
स्थिति [illegible] निर्दिष्टः कोपिपदार्थो दृश्यते नान्यारंभणमिति वाचा [illegible] आरभ्यत इति आरंभणं पिण्डरूपेण [illegible] नायामति
काया नाम [illegible] व्यवहारस्यान्यः घटशरावादिरूपेण व्यवस्थितायास्तस्या एव मृत्तिकाया अन्यानि नामानि व्यवहाराश्चान्यान्याश्रयाः तथापि
सर्वं मृत्तिकाद्रव्यमेकमेव नानासंस्थानं नामधेयाभ्यां नानाव्यवहारेणारभ्यत इत्येतदेव सत्यमित्येतेन नानासंस्थानांतभेदाद्विनतः नात्र किंचिद
स्तुनिषिध्यत इति एवं मेवायमर्थः प्रपंचितः [illegible] चये नाश्रुतं श्रुतमित्यादिना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं प्रतिज्ञातं चेद्यथा सोम्ये
केन मृत्पिण्डेनेत्यादि दृष्टांतस्सा ध्याविकलः स्यात् रज्जुसर्पवन्मृत्तिकाविकारस्य घटशरावादेरसत्यत्वं चेत्तदेतेनापि [illegible] प्रमाणांतरे
णाप्रतिपन्नत्वाच्चासिद्धमिति एतद्विप्रतिपद्य [illegible] चेत [illegible] तदृष्टान्ततयोपादानं न घटते संदेवसोम्येदमग्रमासीदेकमेवाद्वितीयमित्यत्र
सदेवैकमेवेत्यवधारणाद्वयं नाद्वितीयमित्यनेन सजातीयविजातीयाः सर्वे विशेषा निषिद्धा इति प्रतीयत इति [illegible] नेन देकाग्र
कारणाभावस्याद्वयावस्थितस्यैव वस्तुनः एकावस्थावस्थितस्य ज्ञानेनावस्थान्तरावस्थितस्यापि [illegible] त्वेनैव ज्ञानं [illegible] दृष्टान्तेन दर्शयित्वाऽस्यैतदके

६

वस्त्वेतरगतविशेषनिषेधकतया बोधकाः । इतरथा तेषामप्यनवबोधकत्वमेव प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषगर्भितत्वात्
अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य स्यात् नाम निर्विशेषे स्वयंप्रकाशे वस्तुनि शब्दः प्रमाणमित्युच्यते स्वतः सिद्धस्य
प्रमाणानपेक्षितत्वात् सर्वैः शब्दैस्तदुपरागविशेषास्तात्त्वाद्यः सर्वे निरस्यन्ते सर्वश्रुतिशिरोवस्तुनिर्णयेषु वस्तुमात्रमनवच्छिन्नं स्वयंप्रकाशं
स्वतन्त्रएवावतिष्ठतइति नैतदेवं केनशब्देन वस्तुनिर्दिश्यत इत्युक्ता विशेषा निरस्यन्ते इति मानशब्दैर्नेति चेत् सोपि सविशेषमेव वस्तुत्ववलंब
तेप्रकृतिप्रत्ययरूपेण विशेषगर्भितत्वेन तत्र सोस्मद्बोधनः इति सकर्मकः सकर्तृकः सविशेषः क्रियान्तरव्यावर्तकस्वभावविशेष
श्च प्रकृत्यावगम्यते प्रत्ययेन च लिङ्गसंख्यादयः स्वतःसिद्धवस्त्वपि स्वभावविशेषविरहे सिद्धिरेव न स्यात् अनन्यसाधनस्वभाव
तयाहि ज्ञप्तेः स्वतःसिद्धिरुच्यते बुद्धिस्वरूपं हि तत्सर्वदा स्वयमेव प्रकाशते चेत्तस्मिन्नन्यधर्माध्यासः संभवति न हि रज्जुस्वरूपे
भासमाने सर्पत्वादिरध्यस्यते अतएव हि भवद्भिरप्याच्छादिका विद्याभ्युपगम्यते न च ज्ञानस्य ... प्रकाशनिवर्तकज्ञानस्य ... हिताया
विषयः अन्यथा तस्य निवर्तकत्वं च न स्यात् प्रतिबन्धकानामपि रज्जुस्वरूपप्रकाशनेन हि सर्पत्वं बाध्यते एकं चाद्वितीयं ज्ञानमात्रं वस्तु
निर्विशेषं नाभिधीयते सन्न वर्तते विशेषणं भवतीति सर्वश्रुतिप्रतिपादितं सर्वं विशेषणविशिष्टं ब्रह्म न भवति अतः प्रामाणिकानां नैकेनापि
प्रमाणेन निर्विशेषवस्तुसिद्धिः निर्विकल्पकप्रत्यक्षेपि सविशेषमेव वस्तु प्रतीयते अन्यथा सविकल्पके सोयमिति पूर्वावगतप्रकारवि
शिष्टप्रत्ययानुपपत्तेः वस्तुसंस्थानविशेषरूपत्वाज्जात्यादेः निर्विकल्पकदशायामपि संस्थानवस्त्विति प्रतीयते द्वितीयादि
प्रत्ययेषु तस्यैव संस्थानविशेषस्यानेकवस्तुनिष्ठतामात्रं प्रतीयते संस्थानरूपप्रकारस्य पदार्थस्यानेकवस्तुनिष्ठतया नेकवस्तु

भेदहेतुभूतोवस्थाविशेषयोगः एतदुक्तं भवति एकमेव कारणभूतं द्रव्यमवस्थान्तरयोगेन कार्यमित्युच्यते इति एकविज्ञानेन सर्वविज्ञानं प्रतिपादयि
ष्यतोतदसत्कार्यवादे न सेत्स्यति तथा हि निमित्तसमवाय्यसमवायिप्रभृतिभिः कारणैरवयव्याख्यं कार्यं द्रव्यान्तरमेवोत्पाद्यत इति कारणभू
तवस्तुनः कार्यस्य वस्त्वन्तरत्वात् तज्ज्ञानेनास्य ज्ञातता कथमपि न संभवति इति कथमवयवी द्रव्यान्तरं निरस्यत इति चेत् कारणगताव
स्थान्तरयोगस्य द्रव्यान्तरोत्पत्तिवादिनः संप्रतिपन्नस्यैवैकत्वेनामान्तरस्य व्यवहारान्तरादेरुपपादकत्वात् द्रव्यान्तरादर्शनाच्चेति कारण
मेवावस्थान्तरापन्नं कार्यमित्युच्यत इत्युक्तं ननु निरधिष्ठानभ्रमासंभवन्यायनायासत्कार्यवादनिरासः क्रियते तथा हि एकचिद्रूपम
त्वमेवाविद्याच्छादितं जगद्रूपेण वर्तत इति अविद्याध्यस्तत्वाप मूलकारणं सत्यमित्यभ्युपगतं यमितसत्कार्यवादनिरासः नैतदेवं एकवि
ज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तमुखेनासत्कार्यवादस्यैव प्रयुक्तत्वादित्युक्तं भवन्मते त्वसाधिष्ठानभ्रमस्य दुरुपपादत्वाच्च यस्य हि चे
तनगतदोषः पारमार्थिकः दोषाश्रयत्वं च पारमार्थिकं तस्य पारमार्थिकदोषाणामेकस्य पारमार्थिकगन्धर्वनगरादिदर्शनमनुपप
न्नं यस्य तु दोषश्चापारमार्थिकः दोषाश्रयत्वं चापारमार्थिकं तस्यापारमार्थिके नाश्रये एतदुपपन्नमिति भवन्मते न निरधि
ष्ठानभ्रमासंभवः एतच्चैतद्बाधकमाकोप्यपि सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेत्यादिषु सामानाधिकरण्यश्रुतिसिद्धानेकगुणविशि
ष्टैकार्थावबोधनमविरुद्धमिति सर्वगुणविशिष्टं ब्रह्माभिधीयत इति पूर्वमेवोक्तं [illegible] अदिश्यो नेति नेतीति बहुधा निषेधो दृश्यत इति चेत्
किमत्र निषिध्यत इति वक्तव्यं द्वे वाव ब्रह्मणो रूपे [illegible] प्रपञ्चः सर्वोपि निषिध्यत इति चेन्मैवं मूर्तामूर्तरूपतया
अप्रज्ञातमर्थं रूपतयोपदिश्य पुनस्तदेव निषेद्धुमयुक्तं प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति कृत्वा हि निषेधवाक्यार्थः सूत्रकारः स्वय

तोरप्रसूतात्सर्वस्य ब्रह्मकारणत्वं वक्तुं सदेव सोम्येदमित्यारभ्य इदमग्रे सदेवासीदिति अग्रइति कालविशेषद्वंद्वमिदं वा चास्य प्रपंचस्यासदाप
त्तिरूपां क्रियां सद्द्रव्यतां च वदति एकमेवेति चास्य नानानामरूपविकारप्रहाणेन स्मिन्नुपपादिते अस्य जगतः सदुपादानता प्रतिपादिता भवति
अन्यत्रोपादानकारणस्य स्वव्यतिरिक्ताधिष्ठात्रपेक्षादर्शनेऽपि सर्वविलक्षणत्वादस्य ब्रह्मणस्सर्वशक्तियोगो न विरुद्ध इति अद्वितीयपदम
धिष्ठात्रंतरं वारयति सर्वशक्तियुक्तत्वादेव ब्रह्मणः काश्यन्नन्त्यन्तयः प्रथममुपादानकारणत्वं प्रतिपाद्य निमित्तकारणमपि तदेवेति प्रतिपा २६
दयन्ति यथा श्रुतिः अन्याश्च श्रुतयो ब्रह्मणो निमित्तकारणत्वमनुत्त्वा यस्य ब्रह्मणोपादानत्वादिकमभिधतिपादितो यस्मदवशात्तेनोक्तत्वादुपाद
नकारणमादित्यत्राद्यो पाकारणं च ब्रह्मैवेति परिहरन्ति किंस्विद्वनं क उ स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः मनीषिणो मनसा पृच्छते
तदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ब्रह्मवनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः मनीषिणो मनसा ब्रवीमि वः ब्रह्माध्य
तिष्ठद्भुवनानि धारयन्निति सामान्यतो दृष्टेन विरोधमाशंक्य ब्रह्मणः सर्वविलक्षणत्वेन परिहार उक्तः अतः सदेव सोम्येदमग्र आसीद
त्यत्राप्यग्रइत्यादयो नेका विशेषाः ब्रह्मणः प्रतिपादिता भवन्ति मत निर्विशेषवाच कोपि शब्दो न दृश्यते प्रस्तुत जगद्ब्रह्मणोः कार्यकारण
भावज्ञापनाय अग्र इति कालविशेषसद्भावः आसीदिति च क्रियाविशेषः जगदुपादानता जगन्निमित्तता च निमित्तोपादानयोर्भेदनि
रसनेन तस्यैव ब्रह्मणः सर्वशक्तियोग आप्रतिपन्नाता सहस्रशो विशेषा एव प्रतिपादिता यतो वास्तवकार्यकारणभावादि ज्ञापनेषु व
चमनत एवासदेवेदमग्र आसीदित्यारभ्य असत्कार्यवादनिषेधश्रुति पदेषु तत्सत्वेन सोम्येवं स्यादिति प्रागसतउत्पत्तिरहेतुकेत्यर्थः तदेवोप
पादयति कथमसतस्सज्जायेतेति असत उत्पन्नमसदात्मकमेव भवतीत्यर्थः यद्यपि द उत्पन्नं घटादिकं मदात्मकं सत उत्पत्तिर्नाम व्यवहारवि

वधिकातिशयापरिमितोदारगुणसागरानिमेषकलाकाष्ठामुहूर्तादिपरार्द्धपर्यन्तापरिमितव्यवच्छेदस्वरूपसर्वोत्पत्तिस्थितिविनाशादि
सर्वपरिणामनिमित्तकालकृतपरिणामास्पृष्टानन्तमहाविभूतिस्वलीलोपकरणस्वांशभूतानन्तबद्धमुक्तनानाविधचेतनतद्भोग्य
भूतानन्तविचित्रपरिणामशक्तिचेतनेतरवस्तुजातान्तर्यामित्वकृतसर्वशरीरत्वसर्वप्रकारावस्थानाविष्कृतपरं ब्रह्मेति वेदान्तसा
क्षात्कारस्तमभगवद्द्वैपायनपराशरवाल्मीकिमनुयाज्ञवल्क्यगौतमापस्तंबप्रभृतिमुनिगणप्रणीतविध्यर्थवादमंत्ररूपवेदमू
लेतिहासपुराणधर्मशास्त्रोपबृंहितपरमार्थभूतानादिनिधनाविच्छिन्नपाठसंप्रदायऋग्यजुस्सामाथर्वरूपानन्तशाखं वेदं चाभ्यु
पगच्छतामस्माकं किन्नसिद्ध्यतीति यथोक्तं भगवता द्वैपायनेन महाभारते योमामजमनादिं च वेत्ति लोकमहेश्वरं द्वाविमौ पुरुषौ
लोके क्षरश्चाक्षर एव च क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः कालं स पचते तत्र न कालस्तत्र वै प्रभुः एते वै निरयास्तात स्थानस्य परमात्मनः अव्यक्तादिविशेषान्तपरिणाम
र्द्धिसमन्वितं क्रीडा हरेरिदं सर्वं क्षरमित्युपधार्यतां कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः कृष्णस्य हि कृते भूतमिदं विश्वं चराचरमिति
कृष्णस्य कृतइति कृष्णस्य शेषभूतं सर्वमित्यर्थः भगवता पराशरेणाप्युक्तं शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते मैत्रेय भगवच्छब्दः
सर्वकारणकारणे ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः एवमेष महाशब्दो मैत्रेय भ
गवानिति परमब्रह्मभूतस्य वासुदेवस्य नान्यगः तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः एवंप्रका

मेवं वदति मंडूकैतानञ्चो ॥ प्रतिषेधतितेनाब्रवीति चाभ्यइत्युत्तरं त्वग्रथनामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमिति सत्यादिगुणग
णस्यप्रतिपादितत्वादितिपूर्वप्रकृतैतावत्त्वान्नेन भवतिब्रह्मेति ब्रह्मण एतावत्त्वात्तत्तावत्प्रतिषिध्यत इति सूत्रार्थः नेह नानास्ति किंचनेत्यादिनाना
नात्वप्रतिषेध एव हृश्यत इतिचेत् अत्राप्युत्तरं ओंसर्वस्य वशी सर्वस्येशान इति सत्यसंकल्पत्वसर्वैश्वर्यत्वप्रतिपादनात् तेनाचेतनसर्ववस्तु
शरीर ईश्वर इति सर्वप्रकारसंस्थितः स एक एवेति तत्प्रत्यनीकाः ब्रह्मात्मकनानात्वं प्रतिषिद्धं न भवदभिमतं सर्वान्विधप्रकारासु श्रुतिष्वव
स्थिति [illegible] तिनक्वचिदपि ब्रह्मणः सविशेषत्वनिषेधकः कोपिशब्दोस्त्यपि ते अपि च निर्विशेषवस्तुनःमात्रप्रमाणं तत्कोपादिकाविद्यातिरो
हितस्वस्वरूपस्यजगतो नानात्वं पश्यतीत्ययमर्थो नदुष्टः ते तिरोधानेनाम प्रकाशनिवारणं तत्स्वरूपातिरेकि प्रकाशधर्मानभ्युपगमेन
प्रकाशस्यैव स्वरूपत्वात् स्वरूपनाशः स्यात् प्रकाशपर्यायं ज्ञानं नित्यं सत्प्रकाशो विद्यानिवर्त्य इति वा लीलाभावितमिदं प्रति
ह्ययाप्रकाशस्तिरोहित इति प्रकाशोत्य [illegible] तिरोधानं वे घोविद्यमानस्याविनाशेभाप्रथाशस्यस्यानुपपत्तेः प्रकाशनाश एव स्यात् प्रकाशस्य विसो ५
निर्विकारस्तिष्ठतीति चेत्सत्यामप्यविद्यायां ब्रह्मणि न किंचित्तिरोहितमिति नानात्वं पश्यतीति भवतामयं व्यवहारः सत्वनिर्वचनीयए
वननु च भवतोपि ज्ञानस्वरूपस्यात्माभ्युपगतस्य सत्यस्य प्रकाशः तस्य च देवादिस्वरूपात्माभिमानेन स्वरूपप्रकाशतिरोधानमवश्याश्र
यणीयं स्वरूपप्रकाशोपसंहृतिस्वात्मन्याकारान्तराध्यासाद्योगात् तेनाभवत्पक्षे प्रसमानो दोषः किं त्वस्माकमेकस्मिन्नात्मनि भवदुक्तरीत्येतदुर्व
रत्वं भवतामात्मानंत्याभ्युपगमात् सर्वं सम्यग्दोषः परिहरणीयः अत्रोच्यते स्वभावतो मलप्रत्यनीकानंतज्ञानानंदैकस्वरूपस्याभाविकान

श।२

भूतानां नानाविधानां शरीराणां नानाजीवत्वमेवमनेकेनैव परिकल्पितत्वात् जीवा मिथ्याभूता इति ब्रह्मणः स्वस्वरूपव्यतिरिक्तस्य जीवभा
वस्य च सर्वशरीराणां च कल्पितत्वादेकस्मिन्नपि शरीरे शरीरवज्जीवभावस्य च मिथ्यारूपत्वात् सर्वाणि शरीराणि मिथ्यारूपाणि तत्र जीवभा
वस्य मिथ्यारूपत्वे एकस्य शरीरस्य तत्र जीवभावस्य च न कश्चिद्विशेषः अस्मादन्तःस्वसमद्रष्टुः स्वशरीरस्य तस्मिन्नात्मभावस्य च प्रबोधवेला
यामबाधितत्वादन्येषां शरीराणां तद्गतजीवानां च बाधितत्वात् सर्वे मिथ्याभूताः स्वशरीरमेकं तस्मिन् जीवभावश्च परमार्थ इति विशे
षः अपि च केन वाविद्यानिवृत्तिः सा च । कीदृशीति विभावनीयं एकत्वज्ञानं निवर्तकं निवृत्तिश्चानिर्वचनीयप्रत्यनीकाकारेति चेत् अनि
र्वचनीयप्रत्यनीकेऽनिर्वचनीये तच्च सदसद्विलक्षणरूपे च कोटित्रयं न विद्यते ब्रह्मव्यतिरेकेणेतदभ्युपगमे पुनरविद्यानिवृत्तिर्न स्यात् अर्थे
व चेन्निवृत्तिः तत्रापि अविशिष्टमिति वेदान्तज्ञानात्पूर्वमेव निवृत्तिः स्यात् एकत्वज्ञानं निवर्तकं तत्र आभासात्संसार इति भवद्दर्शनं विहन्यते किं
च निवर्तकज्ञानस्याप्यविद्यारूपत्वात्तन्निवर्तनं केनेति तस्यानिवर्तकज्ञानेनेतरसमस्तभेदं निवर्त्य स्वापि कतकादिवत् स्वयमेव विनश्यतीति चेद
नलविषनाशनविषान्तरवदिति चेन्न निवर्तकज्ञानस्य ब्रह्मव्यतिरिक्तत्वेन तस्य स्वरूपतदुत्पत्तिविनाशानां मिथ्यारूपत्वात्तद्विनाशरूपा
विद्यानिवृत्तेरपि तद्विनाशदर्शनस्य निवर्तकमतन्नमेव तद्वा अस्मादीनामपूर्वानवस्थाविशेषविषयिणामपदं परावर्जनीये च अपि चाचिन्मात्रब्रह्म
व्यतिरिक्तः कृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता अध्यासरूप इति चेन्न तस्य निषेध्यत्वान्निवर्तकज्ञानकर्मत्वात्तत्कर्तृत्वानुपपत्तेः ब्रह्म
स्वरूपमेवेति चेत् ब्रह्मणो निवर्तकज्ञानं प्रति ज्ञातृत्वं किं स्वरूपं उताध्यस्तं प्रथमस्ते चेत् प्रथमसमासस्त्वे मूलमविद्यानाशं च निवर्तकज्ञानावि
षयतयावतिष्ठते तन्निवृत्तिकाले ताभ्युपगमे तस्यापि निरूपत्वादनवस्था सर्वस्य हि ज्ञानस्य त्रिरूपत्वविरहे ज्ञानत्वमेव हीयते केवलचित्के

दूरमलं सत्यं व्याप्य कर्मत्वयं समस्तं देयर हि तं विस्वं व्याप्य परमं पदं कल्लानुवृत्ती दिमयश्चकालेनयद्धिभूते: परिणामहेतुः कौऽतो बाल
कस्येव चेष्टां तस्य निष्ठाम ये त्याद्दिमनुनापि प्रशासितारं सर्वेषामणीयांसमणीयसामित्यादिनोक्तः याज्ञवल्क्येनापि चेतनस्य प्रशास्ता
नाच्छिद्यभुच्छिः परमात्मेतिप्राप्तं तेनापि पूःशायिनः सर्वगुहाशयस्येत्यादि सर्वप्राणिनः गुहाया यस्य परमात्मनः पूःपुरं शरीरमित्यर्थः प्राणिन
इति सजीवात्मकमूलसंघाता: नक्तिमनेनाऽऽवरणं चोदितं तु न परिहृतं उच्यते एवमभ्युपगच्छतामस्माकं मात्मधर्मभूतस्यैव चैतन्यस्य॥
स्वाभाविकस्यापि कर्मणा पारमार्थिकं संकोचविकाशं च ब्रुवतां सर्वमिदं परिहृतं भगवतस्तु प्रकाशो न धर्मभूतः तस्य संकोचविकाशौ वाऽनु
भ्युपगम्यते प्रकाशप्रसरानुत्पत्तिरेव तिरोधानं भवतां तु कार्मेदयः कुर्वतिनिम्नविद्या चेति तिरोधानं तिरोधानं भूतया स्वरूपभूतप्रकाशनाशः एवं
मेवोक्तं अस्माकं त्वविद्यारूपेण कर्मणा स्वरूपनित्यधर्मभूतप्रकाशः संकुचितः तेनेन्द्रादिस्वरूपात्माभिमानो भवति इति विशिष्टं यथोक्तं
अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यतिसन्ततान् तया तिरोहित
त्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता सर्वभूतेषु भूपाल तारतम्येन वर्ततेति क्षेत्रज्ञानां स्वधर्मभूतस्य ज्ञानस्य कर्मसंज्ञया विद्यया संकोचं विकाशं
च दर्शयति अपि च ब्रह्माच्छादिकाविद्याश्रुतिभिः [illegible] स्वरूपतिरोधानहेतुर्दोषरूपाभ्युपेतेतस्या अभिथ्यात्वेन प्रपंचवत् सदर्शन
मूलदोषापेक्षत्वात् न सा मिथ्यादर्शनमूलदोषः स्यादिति ब्रूमः मिथ्यादर्शनमूलं स्यात् तस्याश्चानादित्वेति मिथ्यारूपत्वाद्व्रह्म [illegible] दोषत्वे ने
वानादित्वात्तद्दर्शनमूलपरमार्थदोषानभ्युपगमाच्च वृथैव तद्दर्शनमूलं स्यात् तस्य नित्यत्वात् निर्मोक्षप्रसङ्गः [illegible] एकमेवाद्वितीयं
जीववत् निर्जीवानीतरशरीराणि स्वप्रवृत्तानानाविधप्रेरणा यथा निर्जीवत्वं त [illegible] रमेकमेव जीववत् तस्य स्वप्रवेलायां इत्य

अज्ञानमूलमिति त्वयैवोक्तं पश्चाज्ज्ञानबाधादर्शनं तु सर्वशून्यवादस्येति विशेषः सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनश्च
पक्षसाधनप्रमाणाभावः प्रमाणानभ्युपगमे नाभियुक्तैर्वादानधिकार एव प्रतिपादितः अयं कारणानुपपत्त्वान्न तादृक्शून्यवादिन इति
अपि च प्रत्यक्षादेः प्रपंचस्य मिथ्यात्वं केन प्रमाणेन साध्यते प्रत्यक्षस्य दोषमूलत्वेनान्यथासिद्धिसंभावनात् निर्दोषशास्त्रमनन्यथासिद्धं प्रत्य
१० क्षस्य बाधकमिति चेत् केन दोषेण जातं प्रत्यक्षमनन्तं भेदविषयमिति वक्तव्यं अनादिभेदवासनाख्यदोषजातप्रत्यक्षशास्त्रयोर्न बाध्य
बाधकभावसिद्धिः आकाशवाय्वादिभूततत्तद्धर्मस्पर्शादियुक्तमनुष्यत्वादिसंस्थानसंस्थितपदार्थग्राहिप्रत्यक्षेण शास्त्रं तु प्रत्यक्षाद्यपरिच्छे
द्यसर्वान्तरात्मत्वाद्यनंतविशेषणविशिष्टब्रह्मस्वरूपतदुपासनाद्याराधनप्रकारतत्प्राप्तिपूर्वकतत्प्रसादलभ्यफलविशेषतदनिष्टक
रणमूलनिग्रहविशेषविषयमिति शास्त्रप्रत्यक्षयोर्न विरोधः अनादिनिधनाविच्छिन्नपाठसंप्रदायप्राप्तानेकगुणविशिष्टस्य शा
स्त्रस्य बलीयस्त्वं वदता प्रत्यक्षपारमार्थ्यमवश्यमभ्युपगंतव्यमित्यलमनेन श्रुतिशतविततिवातवेगप्रवाहतत्कुदृष्टियुक्तिजालतू
लनिरसनेनेत्युपरम्यते द्वितीये तु पक्षे उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरानभ्युपगमाद्ब्रह्मण्येवोपाधिसंसर्गाद्दोपाधिकाः सर्वे दोषाः ब्रह्मण्येव
भवेयुः ततश्चापहतपाप्मत्वादिनिर्दोषत्वश्रुतयः सर्वा विहन्यन्ते यथा घटाकाशादेः परिच्छिन्नतया महाकाशाद्भेदेऽपि परस्परभेदोऽपि
दृश्यते तत्र स्थाणुगुणादोषा नानवच्छिन्ने महाकाशेन संबध्यन्ते एवमुपाधिकृतभेदव्यवस्थितजीवगतदोषास्त्वनुपहिते परे ब्रह्मणि न
संबध्यंत इति नैतदुपपद्यते निरवयवस्याकाशस्यापरिच्छेद्यस्य घटादिभिः छेदासंभवात् तैरेवाकाशेन घटादयः संयुक्ता इति ब्रह्म
णोऽप्यपरिच्छेद्यत्वात् ब्रह्मैवोपाधिसंयुक्तं स्यात् घटसंयुक्ताकाशप्रदेशोऽन्यस्मादाकाशप्रदेशाद्भिद्यते इति चेत् आकाशस्यैव प्रदेशभेदेन घ
टादिसंयोगात् च [redacted] दो गच्छति तस्य प्रदेशभेदस्यानियमश्च इति तद्ब्रह्मण्येव प्रदेशभेदनियमेनोपाधिसंसर्गाद्दुपाधियोगस्थितिसंयुक्तवि

चनार्थविशेषप्रतीतिसिद्धिरूपत्वात् ज्ञानस्य त्रिरूपत्वविरहे भवतां स्वरूपभूतज्ञानवत् निवर्तकज्ञानमनिवर्तकं स्यात् ब्रह्मस्वरूपस्यैव ज्ञात-
त्वाभ्युपगमे अस्मदीय एव पक्षः परिगृहीतः स्यात् निवर्तकज्ञानस्वरूपं ज्ञातत्वं च स्वनिवर्त्यान्तर्गतमिति वचनं भूतलव्यतिरिक्तं छेत्तृ-
छिन्नदेवस्तेनेत्येतस्यापि एवच्छेदनक्रियायां छेत्तृत्वस्य च्छेद्यान्तर्भाववन्ज्ञानवदुपपत्तेः अपि च निखिलभेदनिवर्तकसिद्धमैक्यज्ञानं केन ज्ञा-
तमिति विवेचनीयं श्रुत्यैवेति चेत् तस्य ब्रह्मव्यतिरिक्ताया अविद्यापरिकल्पितत्वात् प्रपंचबाधकज्ञानस्योत्पादकत्वं न संभवति तथा हि दुष्ट-
कारणजन्यमपि रज्जुसर्पज्ञानं दुष्टकारणजन्येन रज्जुरियं न सर्प इति ज्ञानेन बाध्यते रज्जुसर्पज्ञानभये वर्तमाने केनचिद्भ्रान्तेन पुरुषेण
रज्जुरियं न सर्पः इत्युक्तेऽप्ययं भ्रान्त इति ज्ञाते सति तद्वचनं रज्जुसर्पज्ञानस्य बाधकं न भवतीति भयं च न निवर्तते प्रयोजकज्ञानवतः श्रवण-
वेलायामेव ब्रह्मव्यतिरिक्तत्वेन श्रुतेरपि भ्रान्तिमूलत्वं ज्ञातमिति निवर्तकज्ञानस्यानुत्पन्नत्वात् सामग्रीभूतशास्त्रस्य च ब्रह्मव्यतिरि-
क्ततया यद्यपि बाध्यत्वमुच्यते तर्हि प्रपंचनिवृत्तेर्मिथ्यात्वमापततीति प्रपंचस्य सत्यता स्यात् स्वप्नदृष्टपुरुषवाक्यावगतपित्रादि-
मरणस्य मिथ्यात्वेन पित्रादिसत्यतावत् किं च तत्त्वमस्यादिवाक्यं न प्रपंचस्य बाधकं भ्रान्तिमूलत्वात् भ्रान्तपुरुषोक्तरज्जुसर्पबाधकवाक्य-
वत् ननु च स्वप्ने कस्मिंश्चिद्भयेन गर्ते मा भैस्त्वं स्वप्नदशायामेवायं स्वप्न इति ज्ञाने सति पूर्वभयनिवृत्तिर्दृष्टा तद्वदत्रापि संभवतीति चेन्न स्वप्नदशाया-
मेव सोऽपि स्वप्न इति ज्ञाने सति पुनर्भयनिवृत्तेरेवादृष्टेति न कश्चिद्विशेषः श्रवणवेलायामेव सोऽपि स्वप्न इति ज्ञातमेवेत्युक्तं यद्यपि चेदमुक्त-
भ्रान्तिपरिकल्पितत्वेन मिथ्यारूपमपि शास्त्रं सद्वितीयं ब्रह्मेति बोधयति तस्मात्तो ब्रह्मणो विषयस्य प्रपञ्चस्यान्येन बाधादर्शनात् ब्रह्मसु-
स्थितमेवेति तदयुक्तम् शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधितत्वात् इदं भ्रान्तिमूलं वाक्यमिति चेत् सद्वितीयं ब्रह्मेति वाक्यमपि

तत्तीयेऽपि पक्षे भेदवद्भेदस्याप्यभ्युपगमात् तस्य च तज्ञावात् सौभरिभेदवच्च स्वावतारभेदवच्च सर्वेश्वरभेदत्वात् सर्वजीवगतदोषा
स्तस्यैव स्युः एतदुक्तं भवति ईश्वरस्य स्वरूपेणैव सुरनरतिर्यक्स्थावरादिभेदेनावस्थितत्वे हि तदात्मकत्ववर्णनं क्रियते तथा स
त्येकमृत्पिण्डारब्धघटशरावादिगतास्पृश्यकाहरणादि सर्वकार्याणि यथा तस्यैव भवन्ति एवं सर्वजीवगतसुखदुःखादि सर्वमीश्वर
गतमेव स्यात् घटशरावादिसंस्थानानुपमृत्तमद्रव्यं यथा कार्यान्तरान्वितं एवमेव सुरनरपशुमनुजादिजीवत्वानुपयुक्तेश्वरांशाः
सार्वज्ञ्यसत्यसंकल्पत्वादिकल्याणगुणाकरा इति चेत् सत्यम्॥ स एवैकेश्वर एकेनांशेन कल्याणगुणाकरः स एवान्येनांशेन हेय
गुणाकरः इत्युक्तं भवति द्वयोरंशयोरीश्वरत्वाविशेषात् तावंशौ न व्यवस्थिताविति चेत् कस्तेन लाभः एकस्यैवैकेनांशेन निरस्तदुःखि
त्वमंशान्तरेण सुखित्वमपि नेश्वरत्वापकल्पते यथा दिग्वस्त्रस्यैकस्मिन् हस्ते चन्दनपंकानुलेपकेऽपरस्मिन् करे कांडुलिप्तकालंका
रः तस्यैवान्यस्मिन् हस्ते मुद्गरादिघातः कालानलज्वालानुप्रवेशश्च तद्वदेवेश्वरस्य स्यादिति ब्रह्मज्ञानवादादपि पापीयानयं भेदाभे
दपक्षः अपरिमितदुःखस्य पारमार्थिकत्वात् संसारिणामनन्तत्वेन दुस्तरत्वाच्च तस्माद्विलक्षणो जीवांश इति चेदागतोऽसि तर्हि म
दीयं पन्थानं ईश्वरस्य स्वरूपेण तादात्म्यवर्णने स्यादयं दोषः आत्मशरीरभावेन तु प्रतिपादने न कश्चिद्दोषः अस्तु तर्हि निखिलचेतनानियम
नादिमहानयं गुणः प्रतिपादितो भवति सामानाधिकरण्यं च मुख्यं वक्तव्यम् अपि च एकस्य वस्तुनो भिन्नाभिन्नत्वं विरुद्धत्वान्न संभवति
तन्तुत्वं घटस्य पटाद्भिन्नत्वे सति तस्य तादात्म्यतया तस्मिन्नभावः अभिन्नत्वे सति तस्य तादात्म्यतयाभाव इति एकस्मिन्काले एकस्मिन्
देशे चैकस्य हि पदार्थस्य युगपत्सद्भावोऽसद्भावश्च विरुद्धः जात्यात्मना भावः व्यक्त्यात्मना चाभाव इति चेत् जातेर्मुण्डेन व्यक्त्या चाभेदस्य

युक्तं ब्रह्मप्रदेशभेदाच्च ब्रह्मण्येवोपाधिसंसर्गः स्थाणे स्थाणे बंधमोक्षौ च स्यातामिति सन्तः परिहरंति निरवयवस्यैवाकाशस्य श्रो
त्रेन्द्रियत्वेपींद्रियव्यवस्थावत् ब्रह्मण्यपि व्यवस्थोपपत्तेरिति चेन्न वायुविशेषसंस्कृतकर्णप्रदेशसंयुक्तस्यैवाकाश
स्येंद्रियत्वात्तस्य च प्रदेशाः प्रदेशांतराच्छेदानियमेपींद्रियव्यवस्थोपपद्यते आकाशस्य तु सर्वेषां शरीरेषु गच्छतः प्रति
यमेपि सर्वप्रदेशासंयोगादिति ब्रह्मण्युपाधिसंयोगप्रदेशानियम एकस्याकाशस्य स्वरूपेणैव श्रोत्रेंद्रियत्वमभ्युपगम्यापींद्रि
यव्यवस्थोक्ता परमार्थतस्त्वाकाशं न श्रोत्रेंद्रियं वैकारिकादहंकारादेकादशेन्द्रियाणि जायंत इति हि वैदिकाः यथोक्तं पदार्थे
ण तैजसानींद्रियाण्याहुर्देवा वैकारिकादश ॥ एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः [illegible] वैकारिकस्तैजसो भूतादिरिति
त्रिविधोहंकारः स च क्रमात्सात्विको राजसस्तामसः आकाशादीनि जायंत इति सृष्टिक्रमसमुक्तौ तैजसाद्राजसादहंकारादेकादशेन्द्रियाणि जा
यंत इति परमतमुपन्यस्य सात्विकाहंकाराद्वैकारिकादिंद्रियाणि जायंत इति स्वमतमुच्यते देवा वैकारिकाः स्मृता इति देवा इंद्रियाणि एव भि
न्द्रियाणामहंकारिकाणां भवते श्राव्यायनं मतमाश्रित्य उच्यते भौतिकत्वेपींद्रियाणामाकाशादिभूतविकारत्वादेवाकाशादिभूतपरिणामवि
शेषव्यवस्थिता एव शरीरवत् प्रसृताणामिंद्रियाणि भवन्ति ब्रह्मण्यपि छेदेन निरवयवे निर्विकारेत्वनियमेनानन्तहेयोपाधिसंसर्ग
दोषो दुष्परिहर एवेति श्रद्धानानामेवायं पक्षः इति शास्त्रविदो न बहु मन्यन्ते स्वरूपपरिणामाभ्युपगमादविकारत्वश्रुतिर्व्याप्येतेन
वेंद्यताच ब्रह्मणः शक्तिपरिणाम इति चेत्के यं शक्तिरुच्यते किं ब्रह्मपरिणामरूपा उत ब्रह्मणोनन्याकापीति उभयपक्षेपि परिणामो वर्जनीय एव २

१२ नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामान् प्रधानक्षेत्रज्ञपतिर्गुणेशः ज्ञाज्ञौ द्वावजावीशानीशावित्यादिश्रुति
शतैस्तदुपबृंहणैः सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च इत्यादिवेदविदग्रेसरवाल्मीकिपराशरद्वैपायनवचोभि
श्च परस्य ब्रह्मणः सर्वस्यात्मत्वावगमाच्चिदचिदात्मकस्य वस्तुनस्तच्छरीरत्वाभ्युपगमाच्च शरीरस्य शरीरिणं प्रति प्रकारत
यैव पदार्थत्वात् शरीरशरीरिणोश्च धर्मभेदेऽपि तयोरसंकरात् सर्वशरीरं ब्रह्मेति ब्रह्मणो वैभवं प्रतिपादयद्भिः सामानाधिकर
२२ ण्यादिभिर्मुख्यवृत्तैः सर्वचेतनाचेतनप्रकारं ब्रह्मैवाभिधीयते सामानाधिकरण्यं द्वयोः पदयोः प्रकारद्वयमुखेनैकार्थनिष्ठत्वं
तस्य चैतस्मिन्पक्षे मुख्यता तत्त्वमसि तत्त्वमिति सामानाधिकरण्ये तदिति सर्वजगत्कारणं सर्वकल्याणगुणाकरं निरवद्यं ब्रह्मो
च्यते त्वमिति च तेनैव सामानाधिकरण्येन जीवान्तर्यामिरूपेण तच्छरीरं तदात्मतयावस्थितं तत्प्रकारं ब्रह्मोच्यते इतरेषु सामा
नाधिकरण्यहानिः ब्रह्मणः सदोषता च स्यात् एतदुक्तं भवति ब्रह्मैव मवस्थितमित्यत्रैवंभूतार्थभूतप्रकारतयैव चिदचेतनाचेत वि
नात्मकप्रपंचस्य स्थूलस्य सूक्ष्मस्य च सद्भावः तथा च बहु स्यां प्रजायेयेत्ययमर्थः संपन्नो भवति तस्यैव ह्यवस्य कार्यतया कारणतया च
संस्थितस्य संस्थानं तथा चिदचिद्वस्तुजातमवस्थितमिति ननु च संस्थानरूपेण प्रकारतयैकार्थत्वं जातिगुणयोरेव दृष्टं न द्रव्य यं ५
स्य स्वतंत्रसिद्धियोग्यस्य पदार्थस्यैवंशब्दार्थतयेश्वरस्य प्रकारमात्रत्वमयुक्तमिति चेदुच्यते द्रव्यस्यापि दण्डकुण्डलादेर्द्रव्यान्तरप्रका
रत्वं दृष्टमेव ननु च दण्डादेः स्वतंत्रस्य द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः यथा दण्डी कुण्डलीति अतो गोत्वादितुल्यतया
चेतनाचेतनस्य द्रव्यभूतस्य वस्तुन ईश्वरप्रकारतया सामानाधिकरण्येन प्रतिपादनं युज्यते गौरश्वो मनुष्यो देव इति भूतसं
भूतसंघातरूपाणां द्रव्याणामेव देवदत्तो मनुष्यो जातः पुण्यविशेषेण देवदत्तो गौर्जातः पापेन कर्मणान्यश्चेतनः पुण्यातिरेकेण देवो जात

ति खण्डे मुण्डस्यापि सद्भावप्रसङ्गः खण्डेन च जातेरभिन्नत्वे मुण्डे खण्डस्यापि सद्भावः भिन्नत्वे चास्य द्भावो ऽश्वमहिषत्वस्यैवेति विरोधो दुष्परि
हर एव एवं जात्यादेर्वस्तुसंस्थानतया वस्तुनः प्रकारत्वात् प्रकारिणो ऽत्र पदार्थान्तरत्वं प्रकारस्य पृथक्सिद्ध्यनर्हत्वं पृथगनुपलम्भ
श्च तस्य च संस्थानस्यानेकवस्तुषु प्रकारतयावस्थितिः श्वमादि पूर्वमेवोक्तं तापमिति बुद्धिः प्रकारे कालादयमपि दण्डीति बुद्धिवत् अ
यमेव च जात्यादिप्रकारो वस्तुनो भेद इत्युच्यते तद्योगस्य वस्तुनो भिन्नत्वमिति व्यवहारहेतुरित्यर्थः स च वस्तुनो भेदव्यवह
रहेतुः स्वस्य च संवेदनवत् यथा संवेदनं वस्तुनो व्यवहारहेतुः स्वव्यवहारहेतुश्च भवति अत एव च सन्मात्रग्राहि प्रत्यक्षं न भेद
ग्राहित्वादिवादा निरस्ताः जात्यासंस्थानसंस्थिततस्यैव वस्तुनः प्रत्यक्षेण गृहीतत्वात् तस्यैव संस्थानरूपजात्यादेः प्रतियोग्यपेक्ष
या भेदव्यवहारहेतुत्वाच्च स्वरूपपरिणामदोषश्च पूर्वमेवोक्तः यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी श
रीरं यः पृथिवीमन्तरो यमयति स त आत्मान्तर्याम्यमृतः य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मा
नमन्तरो यमयति स त आत्मान्तर्याम्यमृतः यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्यादि यो ऽक्षरमन्तरे सं
चरन् यस्याक्षरं शरीरं यमक्षरं न वेद यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो दे
व एको नारायणः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति अन्तः प्र
विष्टः शास्ता जनानां सर्वात्मा तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् सत्यं चानृतं च सत्यमभवत् अनेन जीवेना
त्मनेत्यादि पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्
मस्तु ॥

णाशप्रसंगश्च अनित्यत्वेभिहितः तथा प्रकृतेरप्यनादिता श्रुतिभिः प्रतिपादिता अजामेकामित्यादिना प्रकृतिपुरुषयोरजत्वे चद
र्शितं अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः मायांतु प्रकृतिं विद्यान्मायिनंतु महेश्वरमिति प्रकृतिरेवस्वरू
पेण विकारास्पदमिति च दर्शयति गौरनाद्यंतवती सा जनित्री भूतभाविनी तिच स्मृतिश्च भवति प्रकृतिं पुरुषं चैव विद्ध्यनादी
उभावपि विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् भूमिरापोनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृ
23 तिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् प्रकृतिं स्वामवष्टभ्य विसृजामि पु
नः पुनः मयाध्यक्षेण प्रकृतिः सूयते सचराचरमित्यादिका एवं च सति प्रकृतिरपि ईश्वरशरीरत्वात् प्रकृतिशब्दोपि तदात्मभूतस्ये
श्वरस्य तत्प्रकारसंस्थितस्य वाचकः पुरुषशब्दोपि तदात्मभूतस्येश्वरस्य पुरुषप्रकारसंस्थितस्य वाचकः अतस्तद्विकाराणाम
पि तथेश्वर एवात्मा तदाह व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च स एव क्षोभको ब्रह्मन् क्षोभ्यश्च परमेश्वर इति अतः प्र
कृतिप्रकारसंस्थिते परमात्मनि प्रकारभूतप्रकृत्यंशे विकारः प्रकार्यंशे चाविकारः एवं जीवप्रकारसंस्थिते परमात्मनि प्रकार
भूतजीवांशे सर्वे चापुरुषार्थाः प्रकार्यंशे नियन्तानिरवद्यः सर्वकल्याणगुणाकरः सत्यसंकल्प एव तथा च सति कारणावस्थो
पीश्वर एवेति तदुपादानं जगत्कार्यावस्थापि स एवेति कार्यकारणयोरनन्यत्वं सर्वश्रुत्यविरोधश्च भवति तदेवं नामरूप वि
भागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थं जगतस्तदापत्तिरेव प्रलयः नामरूपविभागविभक्तस्थूलचिदचि
द्वस्तुशरीरं ब्रह्म कार्यावस्थं ब्रह्मणस्तथाविधस्थूलभाव एव जगतः सृष्टिरित्युच्यते यथोक्तं भगवता श्रीपराशरेण प्रधानपुंसोरज
योः कारणं कार्यभूतयोरिति तस्मादीश्वरप्रकारभूतसर्वावस्थप्रकृतिपुरुषवाचिनः शब्दास्तत्प्रकारविशिष्टतया चस्थिते परमात्म

इत्यादिदेवादिशरीराणां चेतनप्रकारतया लोकवेदयोः सामानाधिकरण्येन प्रतिपादनं दृष्टं ॥ अयमर्थः जातिर्वा गुणो वा द्रव्यं वा न त
त्रादरः । किंचन द्रव्यविशेषं प्रतिनिविशेषणतयैव यस्य सद्भावस्तस्य तदपृथक्सिद्धेस्तत्प्रकारतया तत्सामानाधिकरण्येन प्रति
पादनं युक्तं यस्य पुनर्द्रव्यस्य पृथक्सिद्धस्यैव कदाचित्कचिद्द्रव्यान्तरप्रकारत्वमिष्यते तत्र मत्वर्थीयप्रत्यय इति विशेषः एव
मेव स्थावरजंगमात्मकस्य सर्वस्य वस्तुन ईश्वरशरीरत्वेन तत्प्रकारतयैव स्वरूपसद्भाव इति तत्प्रकार ईश्वर एव तत्तच्छब्देनाभिधीयत इति
तत्सामानाधिकरण्येन प्रतिपादनं युक्तं तदेतत्सर्वं पूर्वमेव नामरूपव्याकरणश्रुतिविवरणे प्रपंचितं अतः प्रकृतिपुरुषमहदहंका
रतन्मात्राभूतेन्द्रियाद्यारब्धचतुर्दशभुवनात्मकब्रह्माण्डतदन्तवर्तिदेवतिर्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थि
तं सर्वं कार्यं ब्रह्मैवेति कारणभूतब्रह्मज्ञानादेव सर्वं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानमुपपन्नतरं तदेवं कार्यकार
णभावादिमुखेन कृत्स्नस्य चिदचिद्वस्तुनः परब्रह्मप्रकारतया तदात्मकत्वमुक्तं ननु च परब्रह्मणः स्वरूपेण परिणामास्पदत्वे
निर्विकारत्वनिरवद्यत्वश्रुतिव्याकोपप्रसंगेन निवारितं प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्येकविज्ञानेन सर्वविज्ञानप्र
तिज्ञासमर्थनाय दृष्टान्ताभ्यां परमपुरुषस्य जगदुपादानकारणत्वं च प्रतिपादितं उपादानकारणत्वं च परिणामास्पदत्वमेव कथ
मिदमुपपद्यते अत्रोच्यते सजीवस्य प्रपंचस्य विशेषणकारणत्वमुक्तं तत्रेश्वरस्य जीवरूपपरिणामाभ्युपगमे नात्मा श्रुतेर्नि
त्यत्वाच्च ताभ्यः इति विरुध्यते वैषम्यनैर्घृण्यपरिहारश्च जीवानामनादित्वाभ्युपगमेन तत्तत्कर्मनिमित्ततया प्रतिपादितः वै
षम्यनैर्घृण्ये सापेक्षत्वान्न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति अकृताभ्यागमकृतविप्र

वस्थितत्वात् अग्न्यादयः शब्दाः अपि शरीरकतब्रह्मशब्दवत् तस्यैव वाचका भवन्तीत्यर्थः तथा च स्मृत्यन्तरे येयजंतिपितॄन् देवान् ब्राह्म
णान् सहुताशनान् सर्वभूतान्तरात्मानं विष्णुमेव यजंति ते इति पितृदेवब्राह्मणहुताशनादिशब्दास्तन्मुखेन तदन्तरात्मभूतस्य विष्णोरेव वा
चका इत्युक्तं भवति अत्रेदं सर्वथा स्वहृदये जीवात्मानः स्वयमसंकुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपाः सन्तः कर्मरूपाविद्यावेष्टिता
स्तत्तत्कर्मानुरूपज्ञानसंकोचमापन्नाः ब्रह्मादिस्तंबपर्यंतविविधविचित्रदेहेषु प्रविष्टास्तत्तद्देहोचितलब्धज्ञानप्रसरास्तत्तद्दे
14 हात्माभिमानिनस्तदुचितकर्माणि कुर्वाणास्तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते एतेषां संसारमोचनं भगवत्प्रपत्तिम
न्तरेण नोपपद्यते इति तदर्थं प्रथममेषां देवादिभेदरहितज्ञानैकाकारतया सर्वेषां साम्यं प्रतिपाद्य तस्यापि स्वरूपस्य भगवच्छेषतै
करसतया भगवदात्मकतामपि प्रतिपाद्य भगवत्स्वरूपं च हेयप्रत्यनीककल्याणैकतानतया सकलेतरविसजातीयमनवधिकातिशया
संख्येयकल्याणगुणालयं स्वसंकल्पप्रवर्त्यसमस्तचिदचिद्वस्तुजाततया सर्वस्यात्मभूतं प्रतिपाद्य तदुपासनं सांगं तत्प्रापकं प्रतिपाद
यति शास्त्राणीति यथोक्तं निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमलाधर्माः प्रकृतेस्ते न चात्मनः प्रकृतिसंसर्गकृतकर्म
मूलत्वान्नात्मस्वरूपप्रयुक्ता धर्मा इत्यर्थः प्राप्ताप्राप्तविवेकेन प्रकृतेरेव धर्मा इत्युक्तं विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्व
पाके च पण्डिताः समदर्शिनः देवतिर्यङ्मनुष्यस्थावररूपप्रकृतिसंसृष्टस्यात्मनः स्वरूपविवेचनी बुद्धिर्येषां ते पण्डिताः तत्तत्प्रकृतिवि
शेषवियुक्तात्मयाथात्म्यज्ञानवंतस्तत्र तत्रात्यन्तविषमाकारे वर्तमानमात्मानं समानाकारं पश्यन्तीति समदर्शिनः इत्युक्तं तदि
दमाह इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः निर्दोषं देवादिप्रकृतिविशेषसंसर्गरूप
दोषरहितं स्वरूपेणावस्थितं सर्वात्मवस्तु निर्वाणरूपज्ञानैकाकारतया साम्यमित्यर्थः तस्यैवंभूतस्यात्मनो भगवच्छेषतैकरसतयात्त

निर्मुख्यतया वर्त्तन्ते जीवात्मवाची देवमनुष्यादिशब्दवत् यथा देवमनुष्यादिशब्दा देवमनुष्यादिप्रकृतिपरिणामविशेषाणां जीवा
त्मप्रकारतयैव पदार्थत्वात् प्रकारिणि जीवात्मनि मुख्यतया वर्त्तन्ते तस्मात्सर्वं चिदचिद्वस्तु नः परमात्मशरीरतया तत्प्रकारत्वा
त् परमात्मनि मुख्यतया वर्त्तन्ते सर्ववाचकाः शब्दाः अयमेव चात्मशरीरभावः पृथक्सिद्ध्यनर्हाधाराधेयभावो नियन्तृनियाम्यभा
वः शेषशेषिभावश्च सर्वात्मनाधारतया नियन्तृतया शेषितया च आप्नोतीत्यात्मा सर्वात्मनाधेयतया नियाम्यतया शेषतया
अपृथक्सिद्धं प्रकारभूतमित्याकारः शरीरमिति चोच्यते एवं जीवात्मनः शरीरसंबन्धः एवमेव परमात्मनः सर्वशरीरत्वेन सर्वशब्दवा
च्यत्वं तथाह श्रुतिगणः सर्वे वेदा यत्पदमामनन्ति सर्वे वेदा यत्रैकीभवन्ति तस्यैकस्य वाच्यत्वादेकार्थवाचिनो भवन्तीत्यर्थः एको दे
वो बहुधा सन्निविष्टः सहैव सन्तं न विजानन्ति देवाः इत्यादि देवाः इन्द्रियाणि देवमनुष्यादीनामन्तर्यामितयात्मत्वेन निविश्य स
हैव सन्तं येषामिन्द्रियाणि मनःपर्यन्तानि न विजानन्तीत्यर्थः तथाच पौराणिकानि वचांसि नताः स्म सर्ववचसां प्रतिष्ठा य
त्र शाश्वती वाचो हि वचसः प्रतिष्ठा कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमं वेदैश्च सर्वैरहमेव वेद्यः इत्यादीनि सर्वाणि वचांसि सर्व
शरीरात्मविशिष्टं तत्स्वामिनमेव वाचयन्ते तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिः तथाच मा
नवं वचः प्रशासितारं सर्वेषामणीयांसमणीयसां रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परं अन्तः प्रविश्य अन्तर्यामितया सर्वेषां नियन्तारं
अणीयांसं अणीयांसः आत्मानः कृत्स्नस्याचेतनस्य व्यापकतया सूक्ष्मभूताः तेषामपि व्यापकत्वात्तेभ्योऽपि सूक्ष्मतरं इत्यर्थः रुक्मा
भः आदित्यवर्णः स्वप्नधीगम्यः स्वप्नतुल्यबुद्धिगम्यः विशदतमप्रत्यक्षतापन्नानुध्यानैकलभ्य इत्यर्थः एनमेके वदन्त्यग्निं मरुतोऽन्ये
प्रजापतिं इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतमिति एके वेदाः इत्यर्थः उक्तरीत्या परस्यैव ब्रह्मणः सर्वस्य प्रशासितृत्वेन सर्वान्तरात्मतया प्रविश्य

वत्त्वं सर्वशक्तियोगश्चैतस्यैकस्यैव विचित्रानन्तनानारूपता च पुनरप्यनन्तापरिमितानैश्वर्ययोगेनैकरूपता च न विरुद्धेति वस्तुमात्र
स्याम्यादिविरोधचिन्तानयुक्तेत्यर्थः यथोक्तेशक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भाव
शक्तयः भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता: एतदुक्तं भवति सर्वेषामग्निजलादीनां भावानामेकस्मिन्नपि भावे दृष्टे व शक्ति
स्तद्विसजातीयभावान्तरेऽपि चिन्तयितुं युक्ता जलादावदृष्टापि तद्विसजातीया पावके भास्वरत्वोष्णतादिशक्तिर्यथा दृश्यते एवमे
व सर्ववस्तुविसजातीये ब्रह्मणि सर्वसाम्यं नानुमातुं युक्तमिति श्रुतौ विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थः तथाहुः जगदेतन्महाश्चर्यं रूपं
यस्य महात्मनः तेनाश्चर्यमन्तरेणाहं भवता कृष्ण संगतः इति तदेतन्नानाविधानन्तश्रुतिनिकरशिष्टपरिगृहीततद्व्याख्यानपरि
श्रमादवधारितं तथा हि प्रमाणान्तरादृष्टापरिमितपरिणामानेकतत्त्वनियतक्रमविशिष्टो सृष्टिप्रलयौ ब्रह्मणोऽनेकविधाः श्रु
तयो वदन्ति निरवद्यं निरंजनं विज्ञानमानंदं निर्विकारं निष्कलं निष्क्रियं शान्तं निर्गुणमित्यादिका निर्मलज्ञानस्वरूपं ब्रह्मेति काश्चन श्रु
तयोऽभिदधति नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिका
नानात्वनिषेधवादिन्यस्सन्ति काश्चन श्रुतयः यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभि
वदन्यदास्ते सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प
इति सर्वस्मिन् जगति हेयतया वगतं सर्वगुणं प्रतिषिध्य निरतिशयकल्याणगुणानन्त्यं सर्वज्ञता सर्वशक्तियोगं सर्वनामरूपव्याकरणं
सर्वस्याधारतां च काश्चन श्रुतयो ब्रुवते सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वं एकः सन् बहुधा विचचार इत्यादिका ब्रह्मस्वरूपं जगत्

न्नियाम्यतयातदाधारतयातदात्मकत्वं तच्छरीरतन्त्वनुप्रभृतिभिः शब्दैस्तत्सामानाधिकरण्येन च श्रुतिस्मृतीतिहासपुराणेषु प्रति
पाद्यत इति पूर्वमेवोक्तं दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति तस्यैतस्यात्मनः क
मेकृतविचित्रगुणमयप्रकृतिसंसर्गरूपात्संसारान्मोक्षो भगवत्प्रपत्तिमन्तरेण नोपपद्यत इत्युक्तं भवति नान्यः पन्था अय
नाय विद्यत इत्यादिश्रुतिभिश्च मया ततमिदं सर्वं जगदव्यक्तमूर्तिना मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः न च मत्स्था
नि भूतानि पश्य मे योगमैश्वरमिति सर्वशक्तियोगात्स्वैश्वर्यवैचित्र्यमुक्तं तथाहि विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् अन
न्तविचित्रमहाश्चर्यरूपं जगन्मम मायुतायुतांशांशेनात्मतया प्रविश्य सर्वमत्संकल्पेन विष्टभ्यानेन रूपेणानन्तमहाविभूतिर
परिमितोदारगुणसागरो निरतिशयाश्चर्यभूतः स्थितोहमित्यर्थः तदिदमाह एकत्वेसति नानात्वं नानात्वेसति चैकता अ
चिन्त्यब्रह्मणोरूपं कस्तद्वेदितुमर्हति प्रशासितृत्वेनैक एव सन् विचित्रचिदचिद्वस्तुष्वन्तरात्मतया प्रविश्य तत्तद्रूपेण विचित्रप्र
कारो विचित्रकर्मकारयन्नानारूपतां भजते एवं स्वचेत्यांशेन सर्वाश्चर्यमयं नानारूपं जगत्तदन्तरात्मतया प्रविश्य विष्टभ्य नाना
त्वेन स्थितोपि स्वरूपेणानवधिकातिशयासंख्येयकल्याणगुणगणः सर्वेश्वरेश्वरः परब्रह्मभूतः पुरुषोत्तमो नारायणो निरतिशया
श्चर्यभूतो नीलजीमूतसंकाशः पुण्डरीकदलामलायतेक्षणः सहस्रांशुसहस्रकिरणः परमे व्योमन्निति यो वेद निहितं गुह
यां परमे व्योमन् तदक्षरे परमे व्योमन्नित्यादिश्रुतिसिद्ध एक एवावतिष्ठते ब्रह्मव्यतिरिक्तस्य कस्यचिदपि वस्तुन एकस्वभावस्यैक
कार्यशक्तियुक्तस्यैकरूपस्य रूपान्तरयोगः स्वभावान्तरयोगश्च न घटते तस्यैतस्य परब्रह्मणः सर्ववस्तुविसजातीयतया सर्वस्वभा

26

ह्यतुनश्चिह्यतुनश्चाश्रयस्य च स्वरूपस्य भावेनैवैक्यात् संकोचाभेदः समर्थितः ननु एवं तत्त्वमसि श्वेतकेतो तस्य तावदेव चिरमिति ऐक्यज्ञा
नमेव परमपुरुषार्थलक्षणमोक्षसाधनमिति गम्यते नैतदेवं पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति प्रा
त्मानं प्रेरकं चान्तर्यामिणं पृथक् मत्वा ततः पृथक्त्वज्ञानाद्धेतोस्तेन परमात्मना जुष्टोऽमृतत्वमेतीति साक्षादमृतत्वप्राप्तिसाधनमा
त्मनो नियन्तुश्च पृथक्त्वज्ञानमेवेत्यवगम्यते एकवाक्यविरोधादेतदपरमार्थसगुणब्रह्मप्राप्तिविषयमभ्युपगन्तव्यमैक्यज्ञानस्यैव मो
क्षसाधनत्वमिति चेत् पृथक्त्वज्ञानस्यैव साक्षादमृतत्वप्राप्तिसाधनत्वश्रवणाद्विपरीतं कस्मान्न भवति एतदुक्तं भवति द्वयोस्तुल्ययो
र्विरोधे सत्यविरोधेन तयोर्विषयो विवेचनीय इति कथमविरोध इति चेत् अन्तर्यामिरूपेणावस्थितस्य परस्य ब्रह्मणः शरीरतया प्रकारत्वा
ज्जीवात्मनस्तत्प्रकारं ब्रह्मैव त्वमिति शब्देनाभिधीयत इत्येवं ज्ञातव्यमिति तत्त्वमस्यादिवाक्यविषयः एवम्भूताज्जीवान्तर्यामितयावस्थितस्य स्य ट
परमात्मनो निखिलदोषरहिततया सत्यसंकल्पाद्यनवधिकातिशयासंख्येयकल्याणगुणाकरत्वेन च यः पृथग्भावः सोऽनुसंधेय
इत्ययमस्य वाक्यस्य च विषय इत्ययमर्थः पूर्वमेवासकृदुक्तः भोक्ता भोग्यं प्रेरितारं च मत्वेति भोग्यरूपस्य वस्तुनोऽचेतनत्वपरा
धीनत्वं सततविकारास्पदत्वमित्यादयः स्वभावाः भोक्तुर्जीवात्मनश्चामलापरिच्छिन्नज्ञानानन्दस्वभावस्यैवानादिकर्मरू
पाविद्याकृतनानाविधज्ञानसंकोचविकासौ भोग्यभूताचित्संसर्गश्च परमात्मोपासनान्मोक्षश्चेत्यादयः स्वभावाः एवम्भूतभोक्तृ
भोग्ययोरन्तर्यामिरूपेणावस्थानं स्वरूपेणापरिमितगुणाश्रयत्वेन चावस्थानमिति परस्य ब्रह्मणस्त्रिविधावस्थानं ज्ञात्वोपा
स्यार्थः तत्त्वमसीति सद्विद्यायामुपास्यं ब्रह्म सगुणं सगुणब्रह्मप्राप्तिश्च फलमिति पूर्वाचार्यैराख्यातं यथोक्तं वाक्यकारेण युक्तं तद्गुणकोपास
नादिति व्याख्यातं च द्रविडाचार्येण विद्याविकल्पं वदता यद्यपि सच्चित्तो न निर्भुग्नगुणगणदैवतं मनसानुधावेत् तथाप्यन्तर्गुणामे

स्व३

नानाकारंश्रुतिप्राद्यतदैकंप्रतिपादयंति काश्चन पृथगात्मानंप्रेरितारंचमत्वाभोक्ताभोग्यंप्रेरितारंचमत्वाप्रजापतिरकामयत
प्रजाःसृजेयेतिपतिंविश्वस्यात्मेश्वरंतमीश्वराणांपरमंमहेश्वरंतंदेवतानांपरमंचदैवतंसर्वस्येशानइत्यादिकाब्रह्मणःसर्व।
स्मादन्यत्वंसर्वस्यविधितव्यत्वंईश्वरत्वंचब्रह्मणःसर्वस्यशेषितांपतित्वंचेश्वरस्यकाश्चनअंतःप्रविष्टःशास्ताजनानांसर्वात्मा
एषआत्मान्तर्याम्यमृतःयस्यपृथिवीशरीरंयस्यापःशरीरंयस्यतेजःशरीरंयस्याव्यक्तंशरीरंयस्याक्षरंशरीरंयस्यमृत्युःशरीरंय
स्यात्माशरीरमितिब्रह्मव्यतिरिक्तस्यसर्वस्यवस्तुनोब्रह्मणश्चशरीरात्मभावंदर्शयंतिकाश्चनेतिनानारूपाणांवाक्यानामविरो मा ५
धोमुख्यार्थापरित्यागश्चयथाभवतितथावर्णितंनीयंवर्णितंचअविकारश्रुतयःस्वरूपपरिणामपरिहारादेवमुख्यार्थाःनिर्गु
णवादाश्चप्राकृतहेयगुणनिषेधपरतयाव्यवस्थिताः नानात्वनिषेधवादाश्चैकस्यब्रह्मणःशरीरतयाप्रकारतंसर्वंचेतनाचेतनंवस्ति २
तिसर्वस्यात्मतयासर्वप्रकारंब्रह्मैवावस्थितमितिसर्वाद्वितीयाःसर्वप्रकारविलक्षणत्वपतित्वेश्वरत्वकल्याणगुणाकरत्वसत्यकामत्वसत्यसंकल्पत्वा
दिवाक्यंतदभ्युपगमादेवसुस्थितंज्ञानानन्दमात्रवाक्यंचसर्वस्मादन्यस्यसर्वकल्याणगुणाश्रयस्यसर्वेश्वरस्यसर्वशेषिणःसर्वाधारस्य।
सर्वोत्पत्तिस्थितिप्रलयहेतुभूतस्यनिरवद्यस्यनिर्विकारस्यसर्वात्मभूतस्यपरस्यब्रह्मणःस्वरूपनिरूपकधर्मोमलप्रत्यनीकानंदस्वरूपज्ञानमे
वेतिस्वरूपप्रकाशनतयाचस्वरूपमपिविज्ञानमेवेतिच प्रतिपादनादुपपादितंऐक्यवाक्यवादअशरीरात्मभावेनसामानाधिकरण्यमुख्या
र्थोपपादनादेवसुस्थितः एवंचसत्यभेदोवाभेदोवाद्यात्मकतावावेदान्तवेद्यःकोयमर्थःसमार्थितोभवतिसर्वस्यवेदवेद्यत्वात्सर्वसमर्थितंसर्वेश
रीरतयासर्वप्रकारंब्रह्मैवावस्थितमित्यभेदःसमर्थितः एकमेवब्रह्मनानाभूतचिदचिद्वस्तुप्रकारंनानात्वेनावस्थितमितिभेदाभेदोप्रति

सुखेऽरयति भगवान्. यथोक्तं भगवता तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते तेषामेवानु
कम्पार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षिपाम्यज
स्रमशुभानासुरीष्वेव योनिष्विति सोऽयं ब्रह्मभूतः पुरुषोत्तमो निरतिशयपुण्यसंचयक्षीणाशेषजन्मोपचितपापराशेः परम
पुरुषचरणारविंदशरणागतिजनिततदाभिमुख्यस्य सदाचार्योपदेशोपबृंहितशास्त्राधिगततत्त्वयाथात्म्यावबोधपू
र्वकाहरहरुपचीयमानशमदमतपःशौचक्षमार्जवभयाभयस्थानविवेकदयाहिंसाद्यात्मगुणोपेतस्य वर्णाश्रमोचि
तपरमपुरुषाराधनवेषनित्यनैमित्तिककर्मोपसंहृतिनिषिद्धपरिहारनिष्ठस्य परमपुरुषचरणयुगलन्यस्तात्मात्मीयस्य
तद्भक्तिकारितानवरतस्तुतिस्मृतिनमस्कृतियजनकीर्तनगुणश्रवणवचनध्यानार्चनप्रणामादिप्रीतपरमकारुणिकपु
रुषोत्तमप्रसादविध्वस्तस्वान्तध्वान्तस्यानन्यप्रयोजनानवरतनिरतिशयविशदतमप्रत्यक्षतापन्नानुध्यानभक्त्येकलभ्यः
तदुक्तं परमगुरुभिर्भगवद्यामुनाचार्यैः उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति ज्ञानकर्मयोगसंस्कृ
तःकरणस्येत्यर्थः तथा च श्रुतिः विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति अत्राविद्याशब्दे म ४
न विद्येतरत्वात् वर्णाश्रमाचारादिपूर्वोक्तकर्मोच्यते विद्याशब्देन च भक्तिरूपापन्नं ध्यानमुच्यते यथोक्तं इयाज सोऽपि सुबहून्
यज्ञान् ज्ञानव्यपाश्रयः ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्ययेति तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते य एत
द्विदुरमृतास्ते भवन्ति ब्रह्मविदाप्नोति परं स यो ह वै तत्परं वेद ब्रह्म वेद ब्रह्मैव भवतीत्यादि वेदनशब्देन ध्यानमेवाभिहितं निदिध्या

वदेव तां भजन्ते तत्रापि सगुणैव देवता प्राप्यत इति शाण्डिल्यविद्यानिष्ठः ननिर्भग्नगुणगणं दैवतं मनसानुध्यायेत् अपहत
पाप्मत्वादिगुणगणं दैवतादिभक्तं यद्यपि दहरविद्यानिष्ठ एवमभिज्ञेनो न स्मरेत् तथाप्यनन्तगुणां देवतां भजन्ते देव
तास्वरूपानुबन्धि सर्वकल्याणगुणविशिष्टैवोपास्यते अतः सगुणामेव ब्रह्म तत्रापि प्राप्यमिति शाण्डिल्यदहरविद्ययोर्विक
ल्प इत्यर्थः ननु च सर्वस्य जन्तोः परमात्मान्तर्यामीत न्नियाम्यं च सर्वमेवेत्युक्तं एवं च सति विधिनिषेधशास्त्राणामधिका
री न दृश्यते यः स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः स एव कुर्यान्न कुर्यादिति विधिनिषेधयोग्यः नचैवं दृश्यते सर्वस्मिन्प्रवृत्तिजा
ते सर्वस्य प्रेरकः परमात्मा कारयितेति तस्य सर्वनियमनं प्रतिपादितं तथा च श्रूयते एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य
उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषतीति साध्वसाधुकर्मणोः कारयितृत्वान्नैर्घृण्यं च प्राप्नोत्यते सर्वेषा
मेव चेतनानां चिच्छक्तियोगप्रवृत्तिशक्तियोग इत्यादि सर्वं प्रवृत्तिनिवृत्तिपरिकरं सामान्येन संविधाय तन्निर्वहणाय
तदाधारो भूत्वान्तः प्रविश्यानुमंतृतया च नियमनं कुर्वन् शेषित्वेनावस्थितः परमात्मा एतदाहितशक्तिः सर्वप्रवृत्तिनि
वृत्त्यादि स्वयमेव कुरुते एवं कुर्वाणो वीक्ष्यमाणः परमात्मा उदासीन आस्ते अतः सर्वमुपपन्नं साध्वसाधुकर्मणोः कारयि
तृत्वं तु व्यवस्थितविषयं न सर्वसाधारणं यस्तु पूर्वं स्वयमेवातिमात्रं आनुकूल्ये प्रवृत्तः तं प्रतिप्रीतः स्वयमेव भगवान् क
ल्याणबुद्धियोगदानं कुर्वन् कल्याणे प्रवर्त्तयति यः पुनरतिमात्रं प्रातिकूल्ये प्रवृत्तः तस्य क्रूरां बुद्धिं ददन् स्वयमेव क्रूरेष्वेव कर्म

यं२

18

मुख्यकार्थश्रुतिनिकरनिदर्शितोयंपंथाः अनेन चार्वाकक्षपणकौलूक्याक्षपादव्यपणककपिलपतंजलिमतानुसारिणो
वेदबाह्याः वेदबलं विकुर्वन्ति मिश्रहानिरस्ताः वेदबलं विनामपि यथावस्थिततत्त्ववस्तु विपक्षत्वाद्दृष्टांवाहृदास्यंमनुनैवोक्तं
यावेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति रजस्तमोभ्यामस्पृष्टमु
त्तमसत्त्वमेव येषां स्वाभाविको गुणः तेषामेव वैदिकी रुचिः वेदार्थयाथात्म्यावबोधश्चेत्यर्थः यदुक्तं मात्स्ये संकीर्णाः सा
त्त्विकाश्चैव राजसास्तामसास्तथैवेति अयमर्थः केचिद्ब्रह्मकल्पाः संकीर्णाः केचित्सत्त्वप्रायाः केचिद्रजःप्रायाः केचित्तमःप्रा
या इति कल्पविभागमुक्त्वा सत्त्वरजस्तमोमयानां तत्त्वानां माहात्म्यवर्णनं तत्तत्कल्पोक्तपुराणेषु सत्त्वादिगुणमयेन ब्रह्मण
क्रियत इति चोक्तं यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यत इति विशेषतश्चोक्तं अग्नेः ॥
शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः सात्त्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरेः ते
ष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिं संकीर्णेषु सरस्वत्याः इत्यादि एतदुक्तं भवति आदिदेवेन तत्त्वाद्ब्रह्मणा कल्पेषु केषुचि
दहस्सु सत्त्वमुद्रिक्तं केषुचिद्रजः केषुचित्तमः यथोक्तं भगवता न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं
यदेभिः स्यात्त्रिभिर्गुणैः इति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रुतेः ब्रह्मणोपि रजस्त्वेन प्राधान्यकथ
त्वेन च देवनरत्वं गम्यते सत्त्वप्रायेष्वहस्सु तदितरेषु च पुराणानि ब्रह्मणा प्रोक्तानि तेषां परस्परविरोधे सति प्राप्तेति काहः प्रोक्तमेव पुरा
णं यथार्थं तद्विरोधि समयार्थमिति पुराणनिर्णयाय वेदं सत्त्वनिष्ठेन ब्रह्मणामोहितमिति विज्ञायत इति सत्त्वादीनां कार्यं च भगवते वोक्तं

सित व्यइत्यादिनैकार्थ्यात् तदेव ध्यानं पुनरपि विशिनष्टि नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृ
णुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामिति भक्तिरूपापन्नानुध्यानेनैव लभ्यते न केवलं वेदनमात्रेण न मेधयेति
केवलस्य निषिद्धत्वात् एतदुक्तं भवति योयं मुमुक्षुर्वेदान्तविहितवेदनरूपध्यानादिनिष्ठः यदा तस्य तस्मिन्नेवानुध्या
नेनवधिकातिशयाप्रीतिर्जायते तदैव तेन लभ्यते परः पुरुष इति यथोक्तं भगवता पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्य
या भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप भक्त्या मामभिजानाति यावान्यश्चास्मि
तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति तदनन्तरं मां तत एव भक्तितो विशत इत्यर्थः भक्तिरपि निरतिशयप्रि
यानन्यप्रयोजनसकलेतरवैतृष्ण्यावहज्ञानविशेष एवेति तद्युक्त एव तेन परेणात्मना वरणीयो भवतीति तेन लभ्यत इति
श्रुत्यर्थः एवंविधपरभक्तिरूपज्ञानविशेषस्योत्पादकः पूर्वोक्ताहरहरुपचीयमानपूर्वककर्मानुगृहीतभक्तियोग एव य
थोक्तं भगवता पराशरेण वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते पन्था नान्यस्तत्तोषकारक इति निखि
लजगदुद्धरणायावनितलेवतीर्णः परब्रह्मभूतः पुरुषोत्तमः स्वयमेवैतदुक्तवान् स्वकर्मनिरतः सिद्धिं यथा विन्दति त
च्छृणु यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति यथोदितक्रमपरिणतभक्त्येकल
भ्य एव भगवान् बोधायनटङ्कद्रमिडगुहदेवकपर्दिभारुचिप्रभृतिभिः अविगीतशिष्टपरिगृहीतपुरातनवेदान्तव्याख्यान

दमग्र आसीदेकमेवाद्वितीयमिति जगदुपादानता जगन्निमित्तता जगदन्तर्यामितादिमुखेन परमकारणं सच्छ
ब्देन प्रतिपादितं अयमेवार्थो ब्रह्म वा इदमेकमेवाग्र आसीदिति शाखान्तरे ब्रह्मशब्देन प्रतिपादितः अनेन सच्छब्देनाभिहितं ब्रह्मै
वेति गतं अयमेवार्थः तथा शाखान्तरे आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषदिति तथा सद्ब्रह्मशब्दाभ्यामा
त्मैवाभिहित इत्यवगम्यते तथा शाखान्तरे एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणीति सद्ब्र
४३ ह्मात्मादिपरमकारणवादिभिः शब्दैः नारायण एवाभिहित इति निर्णीयते यमन्तः समुद्रे कवयो वदन्तीत्यादिनैव मूर्ध्वं न
तिर्यंचं न मध्ये परिजग्रभत् न तस्येशे कश्चन तस्य नाम महद्यशः न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं हृदा म
नीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्तीति सर्वस्मात् परत्वमस्य प्रतिपाद्य न तस्येशे कश्चनेति तस्मात्परं किमपि न
विद्यत इति च प्रतिषिध्य अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टाविति तेनैकवाक्यतां गमयति तच्च महापुरुषप्रकरणे ह्रीश्च ते ल
क्ष्मीश्च पत्न्याविति च नारायणस्यैवेति द्योतयति अयमर्थो नारायणानुवाके प्रपंचितः सहस्रशीर्षं देवमित्यारभ्य स ब्रह्म स शि
वः सेन्द्रः सोऽक्षरः परमः स्वराडिति सर्वशाखासु परतत्त्वप्रतिपादनपरान् अक्षरशिवशंभुपरब्रह्मपरंज्योतिःपरतत्त्वपरायण
परमात्मादिसर्वशब्दान् तद्गुणयोगेन नारायण एव प्रयुज्यत इति किंचास्य समस्तस्य तदायत्ततां तद्व्याप्यतां तदाधारतां तन्नि
याम्यतां तच्छेषतां तदात्मकतां च प्रतिपाद्य ब्रह्मशिवयोरपीन्द्रादिसमानाकारतया तद्विभूतित्वं च प्रतिपादितं इदं च वाक्यं केवलपर
त्वप्रतिपादनैकपरं अन्यत्किंचिदप्यत्र न विधीयते अस्मिन्वाक्ये प्रतिपादितस्य सर्वस्मात्परत्वेनावस्थितस्य परब्रह्मणो वाक्यान्तर

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञानमेव च प्रवृत्तिं च निवृत्तिं च ... कार्य्याकार्य्ये भयाभये
बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी यया धर्ममधर्मं च कार्य्यं चाकार्य्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी अ
धर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसीति सर्वान्पुराणार्थान् ब्रह्मणः सकाशादधि
गम्यैव सर्वाणि पुराणानि पुराणकाराश्चक्रुः यथोक्तं कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः पृष्टः प्रोवाच भगवानब्ज
योनिः पितामह इति अपि स्येयेषु वेदवाक्येषु परस्परविरुद्धेषु अविरोधः कथमिति चेत्तत्रार्थनिश्चयाद्विरोधः पूर्वमेवो
क्तः यद्यपि वेदविरुद्धवद्दृश्यते प्राणमनसि सहकरणे नांशानो परमात्मनि लिंगप्रतिष्ठाप्यप्राधीनेषां नेप्रश्नप्राधीने वं सर्वं भिद्
ब्रह्माविष्णुरुद्रेन्द्राः सर्वप्रसूप्पन्ने कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये ध्येयः यस्मात्परं नापरमस्ति किं
चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरं तदरूपमनामय
य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः सर्वव्यापी च भगवांस्तस्मात्सर्वग
५ ने तः शिवः यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलं तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणीत्यादिना
नारायणं परं ब्रह्मेति च पूर्वमेव प्रतिपादितं तेनास्य कथमविरोध इति अत्यल्पमेतत् वेदविस्तरप्रोक्तैर्वाक्यन्यायोपबृंहिताः
वेदाः सांगा हरिं प्राहुर्जगज्जन्मादिकारणं जन्माद्यस्य यतः यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसं
विशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति जगज्जन्मादिकारणं ब्रह्मेत्येवगम्यते तच्च जगत्स्थितिप्रलयप्रकरणे ब्रह्मैवावगंतव्यं सदेव सोम्ये

२० तिमत्सु मेतिनान्यः पंथा विद्यतेऽयनायेति पुरुषवेदनस्यामृतत्वहेतुतां तद्व्यतिरिक्तस्यापथ्यार्थतां च प्रतिज्ञाय यस्मा
त्परं नापरमस्ति किंचिदित्तेनेदं पूर्णं पुरुषेण सर्वमित्येतदन्तेन पुरुषस्य सर्वस्मात्परत्वं प्रतिपादितं यतः पुरुषत
त्त्वमेवोत्तरतरं ततो यदुत्तरतरं पुरुषतत्वं तदेवारूपमनामयं य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमे
वापियन्तीति पुरुषवेदनस्यामृतत्वहेतुत्वं तदितरस्य चापथ्यत्वं प्रतिज्ञातं सहेतुकमुपसंहृतं अन्यत्रोपक्रम
गतप्रतिज्ञाभ्यां विरुध्यते पुरुषस्यैव श्रुत्युक्तगुणयोगेन शिवमहादेवाभिधेयत्वं शाश्वतं शिवमच्युतमित्यादिनाम्नात
20 मेव पुरुष एव शिव [illegible] शब्दाभिधेयः सर्वस्मादुत्तरमेव वदन्ति महान् प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्तक इति उक्तेनैव न्याये
न सन्न चासच्छिव एव केवल इत्यादि सर्वे नेयान्कं चन तस्येशे कश्चनेति निरस्तसमाभ्यधिकसंभावनस्य पुरुषस्याऽणोर
णीयानित्यस्मिन्ननुवाके वेदाद्यन्तरूपतया वेदबीजभूतप्रणवस्य प्रकृतिभूताकारवाच्यतया महेश्वरत्वं प्रतिपा
द्य दहरपुण्डरीकमध्यस्थाकाशान्तर्वर्तितया उपास्यत्वमुक्तं अथ मर्थः स वेदस्य वेदजातस्य प्रकृति प्रणव उक्तः प्रणवस्य
प्रकृतिरकारः प्रणवविकारो वेदः स्वप्रकृतिभूते प्रणवे लीनः प्रणवोऽकारविकारभूतः स्वप्रकृतावकारे लीनः तस्य
प्रणवस्य प्रकृतिभूतस्याकारस्य यः परो वाच्यः स एव महेश्वर इति सर्ववाचकजातप्रकृतिभूताकारवाच्यः सर्ववाच्य

प्र२

रेषु ब्रह्मविदाप्नोति परमित्यादिषूपासना विधीयते अतः प्राणं मनसि सह करणैर्गेहेत्यादिना कं सर्वकारणं परमात्मनि कर
णप्राणादि सर्वविकारजातमुपसंहृत्य तमेव परमात्मानं सर्वस्येशानं ध्यायीतेति परब्रह्मणो नारायणस्यैव ध्यानं वि
दधातीति पतिं विश्वस्येति न तस्येशे कश्चनेति च तस्यैव सर्वस्येशानताप्रतिपादिता अत एव सर्वैश्वर्यसंपन्नः सर्वेश्व
रः शंभुराकाशमध्ये ध्येयः इति नारायणस्यैव परमकारणस्य शंभुशब्दवाच्यस्य ध्यानं विधीयते कश्च ध्येयः कारणं तु ध्येयः इति कार्यस्याध्येय
तापूर्वकं कारणध्येयतापरत्वाद्वाक्यस्य तस्यैव नारायणस्य परमकारणतां शंभुशब्द
वाच्यतां च परमकारणप्रतिपादनैकपरे नारायणानुवाक एव प्रतिपन्नेति तद्विरोध्यर्थान्तरकल्पने कारणस्यैव
ध्येयत्वं विधिवाक्येन युज्यते यदपि ततो यदुत्तरमित्यत्र ब्रह्मवाद्यस्य परत्वं प्रतीयत इत्यभिधायि तदपि यस्मात्परं
नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिद्यस्मादन्यत् किंचिदपि परं नास्ति केनापि प्रकारेण पुरुषव्य
तिरिक्तस्य परत्वं नास्तीत्यर्थः अणीयस्त्वं सूक्ष्मत्वं ज्यायस्त्वं सर्वेश्वरत्वं सर्वव्यापित्वात् सर्वेश्वरत्वाद्यस्य एतद्व्यतिरि
क्तस्य कस्याप्यणीयस्त्वं ज्यायस्त्वं च नास्तीत्यर्थः यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिदिति पुरुषादन्यस्य कस्यापि ज्यायस्त्वं
निषिद्धमिति तस्मादन्यस्य परत्वं प्रयुज्यत इति प्रत्युक्तं कस्तर्हि अस्य वाक्यस्यार्थः अस्य प्रकरणस्यैव क्रमेण विदित्वा

प्रमित्यभिगीतपरिगृहीतं वै स्मवं पुराणं जन्माद्यस्य यतः इति जगज्जन्मादिकारणं ब्रह्मेत्यवगम्यते तज्जन्मादिकारणं कि
मिति प्रश्नपूर्वकं विष्णोः सकाशादुद्भूतमित्यादिना ब्रह्मस्वरूपविशेषप्रतिपादनैकपरतया प्रवृत्तमिति सर्वसंमतं तथात
त्रैव प्रकृतिर्यां मयाख्याता व्यक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः परमे

श्वरः विष्णुनामा स वेदेषु वेदान्तेषु च गीयते इति सर्वे वेदवेदान्तेषु च गीयत इति परमकारणतया यमेव गीयत इत्यर्थः य
था सर्वासु श्रुतिषु केवलपरब्रह्मस्वरूपविशेषप्रतिपादनायैव प्रवृत्तो नारायणानुवाकः तथैवेदं वैष्णवं च पुराणं सोऽहमिच्छामि
धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् बभूव भूयश्च यथा महाभाग भविष्यति यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरं लीनमासीद्यथा
यत्र लयमेष्यति यत्र चेति परब्रह्म किमिति प्रक्रम्य विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितं स्थितिसंयमकर्तासौ जगतोऽस्य
जगच्च सः परः पराणां परमः परमात्मात्मसंस्थितः रूपवर्णादिनिर्देशविशेषणविवर्जितः अपक्षयविनाशाभ्यां परिणाम
र्द्धिजन्मभिः वर्जितः शक्यते वक्तुं यः सदास्तीति केवलं सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततः स वासुदेवेति विद्वद्भिः
परिपठ्यते तद्ब्रह्म परमं नित्यमजमक्षयमव्ययं एकस्वरूपं च सदा हेयाभावाच्च निर्मलं तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपव
त् तथा पुरुषरूपेण कालरूपेण च स्थितं स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः अतीतसर्वावरणोऽखिलात्मा तेना
स्तृतं यद्भुवनान्तराले समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशावृतभूतसर्गः इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धि
तोऽसौ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे सई श्वरो

क्ताः सर्वशरीरपरमात्मानमेवाभिदधतीत्युक्तं अतोऽहमितिशब्दः स्वात्मप्रकारप्रकारिणं परमात्मानमेवाचष्टे अतएवमुच्यते आत्मे
त्येवतु गृह्णीयात् सर्वस्यतन्नियन्तृत्वेनेत्यादिनाहंग्रहोपासनं वाक्यकारेणाप्यभिवस्य: कारणावस्थ: स्थूलसूक्ष्मचिदचिद्वस्तु
शरीरः परमात्मैवेति सर्वस्यतन्नियन्तृत्वेनेत्युक्तं आत्मेतितूपयन्ति ग्राहयन्ति चेति सूत्रकारेण च महाभारते च ब्रह्मरुद्रसंवा
दे ब्रह्मा रुद्रं प्रत्याह तवान्तरात्मा मम च ये चान्ये देहसंज्ञिता इति रुद्रस्य ब्रह्मणश्चान्येषां देहिनां च परमेश्वरो नारायण एवान्तरात्मत
यावस्थित इति तथा तत्रैव विष्णुरात्मा भगवतो भवस्यामिततेजसः तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वर इति अत्रैव एतौ द्वौ वि
बुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ तदादर्शितपन्थानौ सृष्टिसंहारकारकाविति अन्तरात्मतयावस्थितनारायणदर्शितपथानौ
ब्रह्मरुद्रौ सृष्टिसंहारकारकाविति अर्थः निमित्तोपादानयोर्भेदं वदन्तो वेदबाह्या एव स्युः जन्माद्यस्य यतः प्रकृतिश्च प्रति
ज्ञादृष्टान्तानुपरोधादित्यादि वेदविन्प्रणीतसूत्रविरोधात् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म तदैक्षत बहु स्यां प्र
जायेयेति ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ब्रह्माध्यतिष्ठद्भुवनानि धारयन् सर्वे निमेषा जज्ञिरे वि
द्युतः पुरुषादधि न तस्येशे कश्चन तस्य नाम महद्यशः नेह नानास्ति किंचन सर्वस्य वशी सर्वस्येशानः पुरुष एवेदं सर्वं यद्भूतं
यच्च भव्यम् उतामृतत्वस्येशानः नान्यः पन्था अयनाय विद्यते इत्यादि सर्वश्रुतिगणविरोधाच्च इति ब्रह्मपुराणे च स्थितिप्रल
यप्रकर्ता योनिरिदमेव परतत्त्वमवगम्यते यथा महाभारते केन सृष्टमिदं सर्वं जगत्स्थावरजंगमं प्रलये च कमभ्येति तन्नो
ब्रूहि पितामहेति पृष्टः नारायणो जगन्मूर्तिरनन्तात्मा सनातन इति वदति ऋषयः पितरो देवा महाभूतानि धातवः जंगमाजं
गमं चेदं जगन्नारायणोद्भवमिति च प्राच्योदीच्य दाक्षिणात्य पाश्चात्य सर्वशिष्ट सर्वधर्म सर्वतत्त्वमवस्थाभिदमेव पथ्या

क्तः सर्वभूतानामयमात्मा विश्वरूपो यतोऽयमित्यर्थः वहतीति चतत्सर्वं वै हरेस्तनुरिति एतदुक्तं भवति तस्मादयमस्य ब्रह्मणो विष्णोर्वि
श्वशरीरतया तादात्म्यमभिहितमिति आत्मशरीरयोश्चाप्यभावात् अपृथक्स्थिततया एवं भूतस्य सर्वेश्वरस्य विष्णोः प्रपंचान्तर्भूतनि
याम्यकोटिनिविष्ट ब्रह्मादिदेवतायेंऽस्यानुप्रवेशेषु तत्तत्समाश्रयणीयत्वाय स्वेच्छावतारः पूर्वोक्तः तदेतद् ब्रह्मादीनां भावनात्रया
न्वयेन कर्मवश्यत्वे भगवतः परब्रह्मभूतवासुदेवस्य निखिलजगदुपकाराय स्वेच्छया स्वेनैव रूपेण देवादिष्ववतार इति
२२ षष्ठेंऽशे शुभाश्रयप्रकरणे मुख्यमुक्तं प्रसंगे देवादिरूपेणावतारेऽपि न प्राकृतो देहः इति महाभारते न भूतसंघसंस्थानो
देहोऽस्य परमात्मन इति प्रतिपादितः श्रुतिश्च अजायमानो बहुधा विजायते तस्य धीराः परिपश्यन्ति योनिमिति कर्मवश्या
ब्रह्मादीनामनिच्छतामपि तत्तत्कर्मानुगुणप्रकृतिपरिणामरूपभूतसंघातसंस्थानविशेषदेवादिशरीरप्रवेशरू
पजन्म वर्जनीयं अयन्तु सर्वेश्वरः सत्यसंकल्पो भगवानेवं भूतशुभेतरजन्मादि कुर्वन्नपि स्वेच्छया स्वेनैव निर
तिशयकल्याणरूपेण देवादिषु जगदुपकाराय बहुधा जायते तस्यैतस्य शुभेतरजन्म कुर्वतोऽपि स्वकल्याण
गुणानन्त्येन बहुविधयोनिं बहुविधं जन्म धीराः धीमतामग्रेसराः जानन्तीत्यर्थः तदेतन्निखिलजगन्निमि
त्तोपादानभूतात् जन्माद्यस्य यतः प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यादिसूत्रैः प्रतिपादितात्परस्माद् ब्रह्मणः
परमपुरुषादन्यस्य कस्यचित्परत्वं परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः इत्याशंक्य सामान्यात्तु इत्यर्थः

वे.सा.
२३

अचिस्मचित्स्वरूपो व्यक्तस्वरूपः प्रकटस्वरूपः सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः संज्ञायते येन तद
स्तदोषं शुद्धं परं निर्मलमेकरूपं संदृश्यते वाप्यधिगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तमिति परब्रह्मस्वरूपविशेषनि
र्णीयायैवमप्रवृत्तं ग्रन्थानिश्चिता त्रिपुरालोन्मन्यपरात्वेन तद्विरोधेन नेयानि ग्रन्थपरत्वं च तत्तदारंभप्रकारैरेवगम्यते सर्वा
त्मना विष्णुवंशस्तामसत्वादनादरणीयः नन्वस्मिन्नपि सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकां स संज्ञां याति भगवाने
क एव जनार्दन इति त्रिमूर्त्तिसाम्यं प्रतीयते नैतदेवं एक एव जनार्दन इति जनार्दनस्यैव ब्रह्मशिवादिकृत्स्नप्रपंचतादात्म्यं विधी
यते जगत्सृजतीति पूर्वोक्तमेव विवृणोति सृष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च उपसंह्रियते चान्ते संहर्त्ता च स्वयं प्रभुरिति च स्र
ष्टृत्वेनावस्थिते ब्रह्मणो सृज्यं च संहर्त्तारं संहार्यं च युगपन्निर्दिश्य सर्वस्य विष्णुतादात्म्यापादनात् सृज्यसंहार्यभूतात्मस्तु नः स्रष्टृ
संहर्त्रोर्जनार्दनविभूतित्वेन विशेषो दृश्यते जनार्दनविष्णुशब्दयोः पर्यायत्वेन ब्रह्मविष्णुशिवात्मिकामिति विभूतिमत एव स्वे
च्छया लीलार्थं विभूत्यन्तर्भाव उच्यते यथैतदनन्तरूपमेवोच्यते पृथिव्या आपस्तथा तेजो वायुराकाशमेव च सर्वेन्द्रियान्तःकरणं
पुरुषाख्यं हि यज्जगत्स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकं एवं सृज्यः स च सर्वकर्त्ता स एव
पात्यत्ति च पाल्यते वा ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्य इति अत्र सामानाधिकरण्येन निर्दिष्टं हेयप्रपञ्चतादा
त्म्यं निरवद्यस्य निर्विकारस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणः कथमुपपद्यते इत्याशंक्य सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति
स्वयमेवोपपादयति स एव सर्वेश्वरेश्वरः परब्रह्मभूतो विष्णुरेव सर्वं जगदिति प्रतिज्ञाय सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति हेतुरु

ना २

२३

निखिलजगत्कारणं सर्वकल्याणगुणाकरं तं ब्रह्म बोधयन्तो वेदान्ता इति

पूर्वपक्षे: शिक्षितः सर्वथा वाक्यानामर्थमवगम्य स्वयमपि सर्वं वाक्यजातं प्रयुंक्ते एवमेव सर्वपदानां स्वार्थाभिधायित्वं संघातविशे कार्य्या
षाणां च यथावस्थितसंसर्गविशेषवाचित्वं जानातीति कार्यार्थ एव व्युत्पत्तिरित्यादि निर्बन्धो निर्बन्धनः अतः परिनिष्प ३
न्नवस्तुनिश्चयस्य बोधकत्वशक्त्यवधारणात् सर्वाणि वेदान्तवाक्यार्थ एव व्युत्पत्तिरस्तु वेदान्तवाक्यान्युपासनविधि २ निरर्थकः
यकार्याधिकृतविशेषणभूतफलत्वेन दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवद्रात्रिसत्रप्रतिष्ठावदपगोरणशतयातना
साध्यसाधनभावबन्धकार्योपयोगितयैव सर्वं बोधयन्तीति तथाहि ब्रह्मविदाप्नोति परमित्यत्र ब्रह्मोपासनविधयकार्याधि
कृतविशेषणभूतफलेन ब्रह्मप्राप्तिः श्रूयते परप्राप्तिकामो ब्रह्म विद्यादिति अत्र प्राप्यतया प्रतीयमानं ब्रह्मस्वरूपं तद्विशेषणं
च सर्वं कार्योपयोगितयैव सिद्धं भवति तदन्तर्गतमेव जगत्स्रष्टृत्वं संहर्तृत्वमाधारत्वमित्याद्युक्तमनुक्तं च सर्वमि
ति न किंचिदनुपपन्नं एवं सति मन्त्रार्थवादगतानामविरुद्धो अपूर्वोऽप्यर्थः सर्वविधिशेषतयैव सिद्धो भवति यथोक्तं भ
ट्टभाष्ये श्मश्रूणि हि वै जायते इति श्रुतेरितुपक्रमप्रय प्रयं वदान स्तुतिपरं वाक्यं तथापि नासतां स्तुतिरूपपद्यत इति
एतदुक्तं भवति सर्वोऽप्यर्थवादभागो देवताराधनभूतयागादेः सांगस्याराध्यदेवताया अदृष्टरूपानगुणानुवदन् स
हस्रशः कर्मणि प्राणस्य बुद्धिमुत्पादयति तेषामसद्भावे प्राणस्य बुद्धिरेव न स्यादिति कर्मणि प्राणस्य ब्रह्म अर्थगुणस
द्भावमवबोधयतीति अनयैव दिशा सर्वे मन्त्रार्थवादावगता ह्यर्थाः सिद्धाः अपि च कार्यवाक्यार्थवादिभिः किमिदं कार्यत्वं ना
मेति वक्तव्यं कृतिभावभाविता कृत्युद्देश्यतेति चेत् किमिदं कृत्युद्देश्यत्वं यदधि कृत्यस्य कृतिवर्त्तने तत्कृत्युद्देश्यत्वमि

पारवत् स्थानविशेषात् प्रकाशादिवदुपपत्तेश्च तदन्यत्र प्रतिषेधादनेन सर्वगतत्वमायामयशब्दादिभ्य इति सूत्रकारः स्वय
मेव निराकरोति मानवधास्त्रप्रादुरासीत्तमोनुदः सिसृक्षुर्विविधाः प्रजा अप एव ससर्जादौ तासु वीर्यमवासृजत् तस्मिन्
यत्तत्स्वयं ब्रह्मेति ब्रह्मणो जन्म श्रवणात्तस्य शरीरत्वमेवावगम्यते तथा च स्मृतिः परमपुरुषस्य तद्विसृष्टस्य च ब्रह्मणः
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यत इति नाम निर्देशाच्च वेदे पुराणे हि
रण्यगर्भादीनां भावनात्रयानन्ययादेशत्वेन स्वभावश्यानर्हे तो पपादनात् तेन तत्त्वं निश्चीयते यदपि केचिदुक्तं सर्वस्य
शब्दज्ञानस्याविच्छन्नार्थवादमेव त्ररूपस्य कार्याभिधायित्वे नैव प्रामाण्यं वक्तव्यं व्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्य
वधारणासंभवाद्व्यवहारस्य च कार्यबुद्धिमूलत्वात् कार्यरूप एव वेदार्थः पारनिष्पन्ने वस्तुनि न वेदः प्रमाणमिति
अत्रोच्यते प्रवर्त्तकवाक्यव्यवहार एव शब्दानामर्थबोधकत्वशक्त्यवधारणं कर्तव्यमिति केयं राजाज्ञा सिद्धवस्तुषु शब्द
बोधकत्वशक्तिग्रहणमनवसुकरं तथाहि केनचिद्धस्तचेष्टादिना अपवरके दण्डः स्थित इति देवदत्ताय ज्ञाप्यते ति ज्ञापयितुं प्रवृ
त्तः केश्चित्तज्ज्ञापने प्रवृत्तोऽपवरके शब्दं प्रयुङ्क्ते मूकः हस्तचेष्टामिमां जानन् पार्श्वस्थोन्यः प्रागव्युत्पन्नोपि तत्स्यार्थस्य बो
धनायापवरके दण्डः स्थित इत्यस्य प्रयोगदर्शनात् स्यार्थस्यायं शब्दो बोधक इति जानातीति किमनुपपन्नं तथा बाल
स्तातोयमियं मातायं मातुलोयं मनुष्योयं मृगश्चन्द्रो यमयं च सर्प इति मातापितृप्रभृतिभिः शनैः शनैरङ्गुलिनिर्देशेन त
त्रतत्र व्युत्पादितः शिक्षितस्तेष्वेव शब्देष्वर्थेषु [illegible] बुद्ध्या व्युत्पत्तिः [illegible] नामकं लोनिर्देशात्[illegible]
प्रयोगः [illegible] सम्बन्धान्तराभावात् संकेतयितृपुरुषाज्ञानाच्च बोधकत्वनिबन्धनस्मृतिक्रमेण निश्चित्य पुनरस्य स्य शब्दस्यायमर्थ इति

निश्चयादेव भवति न च यागं यजेतेत्यत्र प्रथमं नियोगः स्वप्रधानतयैव प्रतीयते स्वर्गकामपदसमभिव्याहारात् स्वसिद्धये स्वर्ग
सिद्ध्यनुकूलता च नियोगस्येति यजेतेति हि धात्वर्थस्य पुरुषप्रयत्नसाध्यतैव प्रतीयते स्वर्गकामपदसमभिव्याहारात् स्वसि
द्ध्यै स्वर्गसिद्ध्यनुकूलता च नियोगस्येति यजेतेति हि धात्वर्थस्य पुरुषप्रयत्नसाध्यतैव प्रतीयते स्वर्गकामपदसमभिव्याहा
रादेव धात्वर्थातिरेकिणो नियोगत्वं स्थिरत्वम् अपूर्वत्वं चेत्यवगम्यते तच्च स्वर्गसाधनत्वम् इतीति निर्बन्धने समभिव्याह
तस्वर्गकामपदार्थान्वययोग्यस्वर्गसाधनमेव कार्यं लिङादयोभिदधतीति लोकव्युत्पत्तिरपि तिरस्कृता एतदुक्तं भ
२४ वति समभिव्याहृतपदान्तरवाच्यान्वययोग्यमेवेतरपदप्रतिपाद्यमिति अन्विताभिधायिपदसंघातरूपवाक्यस्य श्र
वणसमनन्तरमेव प्रतीयते तच्च स्वर्गसाधनरूपं अतः क्रियावदनन्यार्थताविरोधादेव बाधितमेतत् [illegible] इति अत एव गंगायां
घोष इत्यादौ घोषप्रतिवासयोग्यार्थस्यानपरत्वे गंगापदस्याश्रीयते प्रथमं गंगापदेन गंगार्थः स्मृत इति गंगापदार्थस्य
[illegible] वाक्यार्थान्वयो भवति एवमत्रापि यजेतेत्येतावन्मात्रश्रवणे कार्यमनन्यार्थं स्मृतमिति वाक्यान्वयसमये का
र्यस्यानर्थता नावतिष्ठति कार्याभिधायिपदश्रवणवेलायां प्रथमं कार्यमनन्यार्थं प्रतीतमिति तन्न तदपि न संगच्छते व्युत्पत्तिका
ले गवानयनादिक्रियायाः दुःखरूपायाः इष्टविशेषसाधनतयैव कार्यताप्रतीतेः अतो नियोगस्य पुरुषानुकूलत्वं सर्वलोक
विरुद्धं नियोगस्य सुखरूपपुरुषानुकूलतां वदतः स्वानुभवविरोधश्च [illegible] कारी [illegible] किं च सोमयजेतेत्यादिषु सिद्धेपि नियोगः
सिद्धिर्वश्याश्रयणीया तस्मिन्ननुकूलतापर्यायसुखानुभूतिर्नेविद्यते एवमुक्तरीत्या कृतिसाध्यैव [illegible] इष्टसाधनत्वं

ति चेत् पुरुषव्यापाररूपायाः कृतेः कोयमधिकारो नाम यत्साक्षी इच्छया कृतिमुत्पादयति पुरुषः तत्कस्तु हेयत्वमिति चेत् हंत
तर्हि इष्टत्वमेव कस्तु हेयत्वं अथैवं मनुषे इष्टस्यैव रूपद्वयमस्ति इच्छाविषयतया स्थितिः पुरुषप्रेरकत्वं च तत्र प्रेरक
त्वाकारः कस्तु हेयत्वमिति सोयं स्वपक्षाभिनिवेशकारितो व्यामोहः तथाहि इच्छाविषयताप्रतीतस्य स्वरूपतोत्पत्ति
मन्तरेणासिद्धिरेव प्रेरकत्वं तत एव प्रवृत्तेः इच्छायोजनातायामिष्टस्य स्वरूपतोत्पत्तिमन्तरेणासिद्धेः प्रतीयते चेन्न तत
श्चिकीर्षा जायते ततः प्रवर्तते पुरुष इति तत्त्वविदां प्रक्रिया तस्मादिष्टस्य कृत्यधीनात्मलाभातिरेकि किं कस्तु हेयत्वं नाम कि
मपि न दृश्यते अथोच्यते दृष्टहेतुश्च पुरुषानुकूलता तस्य पुरुषानुकूलत्वं कस्तु हेयत्वमिति चेन्नैवं पुरुषानुकूलं सुखमित्य
नं र्थान्तरं तथा पुरुषानुकूलं दुःखपर्यायं अतः सुखव्यतिरिक्तस्य कस्यापि पुरुषानुकूलत्वं न संभवति ननु च दुःखनिवृ
त्तेरपि सुखव्यतिरिक्तायाः पुरुषानुकूलता दृष्टा नेतत् आत्मानुकूलं सुखं आत्मप्रतिकूलं दुःखं इति हि सुखदुःखयोर्विवेकात्
आत्मानुकूलं सुखमिष्टं भवति प्रतिकूलं दुःखं चानिष्टं अतो दुःखसंयोगस्यासह्यतया तन्निवृत्तिरपीष्टा भवति तत एवे
ष्टतासाम्यादनुकूलताभ्रमः तथाहि प्रकृतिसंसृष्टस्य संसारिणः पुरुषस्यानुकूलसंयोगः प्रतिकूलसंयोगः स्वरूपेणाव
स्थितिरिति चतस्रोऽवस्थाः तत्र प्रतिकूलसंबंधनिवृत्तिश्च स्वरूपेणावस्थितिरेव तस्मात्प्रतिकूलसंयोगे वर्तमाने त
न्निवृत्तिरूपा स्वरूपेणावस्थितिरिष्टा भवति तत्रेष्टतासाम्यादनुकूलताभ्रमः अतः सुखस्वरूपत्वादनुकूलतायाः यो
नियोगस्यानुकूलतां वदन्ति ते प्रामाणिकाः परिहसन्ति इष्टस्यार्थविशेषस्य निर्वर्तकत्वेनैव हि नियोगस्य नियोगित्वं स्थिर
त्वमपूर्वत्वं च प्रतीयते स्वर्गकामो यजेतेत्यत्र कार्यस्याधिकारिविशेषितता स्वर्गकामपदसमभिव्याहारेण स्वर्गसाधनत्वम्

थाभोक्तुकामो देवदत्तो गृहं गच्छेदित्युक्ते भोजनकामस्य देवदत्तस्य गृहगमने कर्तृत्वश्रवणाद् देवप्रागस्नातमपि भो
जनसाधनत्वं देवदत्तगृहगमनस्यावगम्यते एवमत्रापि भवतीति न क्रियान्तरं प्रतिकर्तृतया श्रुतस्य क्रियान्तरे कर्तृ
त्वकल्पनं युक्तं यजेतेति यागे कर्तृतया श्रुतस्य हि बुद्धौ कर्तृत्वकल्पनं क्रियते बुद्धौ कर्तृत्वकल्पनमेव हि नियोज्यत्वंय
थाऽत्र नियोज्यः स च कार्यार्थः स्वीयत्वेन बुध्यत इति यद् यत्र त्वानुगुण्येन तद्बुद्ध्यत्वमिति [illegible]नः पचेदिति पाके कर्तृतया
श्रुतस्य देवदत्तस्य पाकार्थगमने पाकानुगुणमिति गमने कर्तृत्वं न युज्यते किं च लिङादिशब्दवाच्यस्यापूर्वरूपकार्यस्य
पूर्वमाम्नायते स्वर्गकामपदसमभिव्याहारानुपपत्तेरिति चेत्कामानुपपत्तिः सिसाधयिषितस्वर्गो हि स्वर्गकामः तस्य
स्वर्गकामस्य कालान्तरभाविस्वर्गसिद्धौ तत्क्षणभङ्गिनो यागादिक्रिया न समर्था इति चेत् अनाघ्रातवेदान्तसिद्धान्ता
नामयमनुपपत्तिः सर्वैः कर्मभिराराधितः परमेश्वरो भगवान्नारायणस्तत्तदिष्टं फलं ददातीति वेदविदो वदन्ति
यथाहुर्वेदविदग्रेसरा द्रविडाचार्याः फलसंविभित्सया ह्येहिककर्मभिरात्मानं पिप्रीषन्तीति सप्रीतोऽलं फलायेति फलसंबन्धेच्छु
याकर्मभिर्यागदानहोमादिभिरिन्द्रादिदेवतामुखेन तदन्तर्यामिरूपेणावस्थितमिन्द्रादिशब्दवाच्यं परमात्मानं भग-
वन्तं वासुदेवमाराधयन्ति स ह्येहिककर्मभिराराधितस्तेषामिष्टानि फलानि प्रयच्छतीत्यर्थः तथा च श्रुतिः इष्टापूर्तं
बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिरिति इष्टापूर्तमिति सकलश्रुतिस्मृतिचोदितं कर्मोच्यते तद्विश्वं

95

श्रीरामायनमः

गोविंद

न विद्यते कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति चेत् किमिदं शेषित्वं किं च शेषत्वमिति कृतं वा कार्यं प्रति संबन्धित्वं शेष
त्वं तत्प्रति संबन्धित्वं शेषित्वमिति चेत् एवं तर्हि कार्यत्वं वा शेषित्वमित्युक्तं भवति कार्यत्वमेव विचार्यते परोद्देशेन प्र
वृत्तकृतिव्याप्यत्वं शेषत्वमिति चेत् कोयं परोद्देशो नामेति हि विचार्यते उद्देश्यत्वं नामेप्सितसाध्यत्वमिति चेत्
किमिदमीप्सितत्वं कृतिप्रयोजनमिति चेत् पुरुषस्य कृत्यारंभप्रयोजनमेव हि कृतिप्रयोजनं तच्चेच्छाविषयः कृत्साधीना
त्मलाभ इति पूर्वोक्त एव अयमेव हि सर्वशेषशेषिभावः परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपं स शेषः
परः शेषी फलोत्पत्तीच्छया यागादेस्तत्प्रयत्नस्योपादेयत्वं यागादिसिद्धीच्छया अन्यस्तत्वमुपादेयं एवं भोगादि
नामपि पुरुषविशेषातिशयाधानेच्छया उपादेयत्वमेव स्वरूपं एवमीश्वरगतातिशयाधानेच्छया उपादेयत्वमेव
चेतनाचेतनात्मकस्य नित्यस्यानित्यस्य च सर्वस्य वस्तुनः स्वरूपमिति सर्वमीश्वरशेषभूतं सर्वस्य चेश्वरः शेषीति
सर्वस्य वशी सर्वस्येशानः पतिं विश्वस्येत्यादिश्रुतिसिद्धं प्रधानं यत्तत्कार्यमभिधीयते इत्ययमर्थः प्राधान्येनैव
भूतभव्ये अपि च स्वर्गकामो यजेतेत्यादिषु लकारवाच्यकर्त्तृविशेषसमर्पणपराणां स्वर्गादिपदानां नियोज्यविशेषसमर्प
णपरत्वं शब्दानुशासनविरुद्धं केनावगम्यते साध्यस्वर्गविशिष्टस्य स्वर्गसाधने कर्तृत्वान्नियोगान्वयो न घटत इति चेन्न नियोज्य
त्वान्वयोपि न घटते इति हि स्वर्गसाधनत्वनिश्चयः स तु शास्त्रसिद्धकर्तृत्वान्वये स्वर्गसाधनत्वनिश्चयः क्रियते

२६

ता भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरमिति तस्मादग्न्यादिदेवतानामात्मभूतपरमपुरुषाराधनरूपाणि कर्माणि स एव
चाभिलषितफलप्रदातेति किमत्र पूर्वोक्तव्युत्पत्तिपदद्वयवर्त्तिना वाच्यतयाभ्युपगतेन फलेन वा प्रयोजनं एवं च सति
लिङादेः कोयमर्थः परिगृहीतः इति चेत् यज देवपूजायामिति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसा
ध्यतां व्युत्पत्तिसिद्धां लिङादयो भिदधतीति न किंचिदनुपपन्नं कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापारसंबंधप्र
कारो हि वाच्यः भूतवर्त्तमानतादिमन्ये वदन्ति लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्ति अपि च कामिनः कर्तव्यतया कर्म
विधायकर्मणो देवताराधनरूपता तद्द्वारा फलसंभवं च न तत्कर्मविधिवाक्यान्येव वदन्ति वायव्यं श्वेतमालभे
त भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यादीनि नात्र फल॥ वि
सिध्यनुपपत्तिः क्वापि दृश्यते इति फलसाधनत्वावगतिरेवोपादानि कोप्यपि न संगच्छते अपेक्षितयागादेः फलसाधन
त्वप्रकारं वाक्यविशेष एव बोधयतीत्यर्थः तस्माद्ब्राह्मणायनापगुरेत तत्र अपगोरणनिषेधविधिवाक्यशेषे श्रूयमाण
निषेधविध्युपयोगीति हि स्वीक्रियते अत्र पुनः कर्तृतया विहितस्य यागादेः काम्यस्वर्गादिसाधनत्वप्रकारं वाक्यशेषावग
तमनादृत्य किमित्युपादानेन यागादेः फलसाधनत्वं प्रकल्प्यते हिरण्यनिधिमेव वरके निधाय याचते कोद्रवादिलवशः रू
पाजनमिति श्रूयते तदेतद्युष्मासु दृश्यते शतयातनासाधनत्वमपि नादृत्य वारेण चोदितान्यनुष्ठितो विहितकर्माकुर्वतो निंदिता [छ२]
नि च कुर्वतः सर्वाणि सुखानि दुःखानि च परमपुरुषानुग्रहनिग्रहाभ्यामेव भवतीत्येष ह्येवानंदयति अथ सोऽभयं गतो भवति

५) स्यापगोरणस्य शतयातनासाधनत्वं   कामिनः ५   ग्रहे ३

बिभर्त्ति इन्द्राग्निवरुणादिसर्वदेवतासंबंधितया प्रतीयमानं तदन्तरात्मतयावस्थितः परमपुरुषः स्वयमेव बिभर्त्ति स्वयमे
वशीकरोति भुवनस्य नाभिः ब्रह्मक्षत्रादिसर्ववर्णस्य भुवनस्य धारकः तैस्तैः कर्मभिराराधितस्तत्तदिष्टफलप्रदानेन
भुवनानां धारक इति नाभिरित्युक्तं अग्निवायुप्रभृतिदेवतान्तरात्मतयावस्थितस्तत्तच्छब्दाभिधेयोयमेवेत्याह तदेवाग्नि
स्तद्वायुस्तत्सूर्यस्तदु चंद्रमा इति यथोक्तं भगवता यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां
तामेव विदधाम्यहं स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हितानिति यां यां तनुमि
तीन्द्रादिदेवताविशेषमास्तदन्तर्यामितयावस्थितस्य भगवतस्तनवः शरीराणीत्यर्थः अहं हि सर्वयज्ञानां
भोक्ता च प्रभुरेव चेत्यादिः प्रभुरेव चेति सर्वफलानां प्रदाता चेत्यर्थः यथा च यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयो
च्युत यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान् ते तरंत्यखिलामेतां मायामात्मविमुक्तय इति सेतिहासपुराणेषु
सर्वेषु वेदेषु सर्वाणि कर्माणि सर्वेश्वराराधनरूपाणि तैस्तैः कर्मभिराराधितः पुरुषोत्तमस्तत्तदिष्टं ददातीति तत्र प्रपंचितं तत्र
एवमेव हि सर्वशक्तिं सर्वेश्वरं सर्वज्ञं भगवन्तमिंद्रादिदेवतान्तर्यामिरूपेण यागदानहोमादिवेदोदितसर्वकर्मणां सर्वफ
लानां प्रदातारं च सर्वाः श्रुतयो वदन्ति चतुर्होतारो यत्र संपदं गच्छंति देवैरित्यादयः चतुर्होतारो यज्ञाः यत्र परमात्मनि देवेष्व
न्तर्यामिरूपेणावस्थितस्य परमात्मनः शरीरतयावस्थितानामिन्द्रादीनां यागादिसंबंध इत्युक्तं भवति यथोक्तं भगव

सूरींयोनिमापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति सर्वकर्माण्यपि सदा कुर्वाणो
मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययमिति आश्रितानुवर्तिनां शाश्वतं पदं चोक्तं अश्रुतवेदान्तानां क
र्मण्यश्रद्धा माभूदिति देवताधिकरणे श्रुतिवादः कृताः कर्ममात्रे यथाश्रद्धा स्यादिति सर्वमेकशास्त्रमिति वेदवि
त्सिद्धान्तः तस्यैतस्य परस्य ब्रह्मणो नारायणस्यापरिच्छेद्यज्ञानानन्दामलत्वस्वरूपवत् ज्ञानबलैश्वर्यवीर्यतेजःप्र
भृत्यनवधिकातिशयासंख्येयकल्याणवत् स्वसंकल्पप्रवर्त्यस्वेतरसमस्तचिदचिद्वस्तुजातवत् स्वाभिमतस्वानुरूपै
करूपदिव्यरूपतदुचितनि रतिशयकल्याणविविधानन्तभूषणस्वशक्तिसदृशापरिमितानन्ताश्चर्यनानायुधस्वाभि मि
मतस्वानुरूपस्वरूपगुणविभवैश्वर्यशीलाद्यनवधिकमहिममहिषीस्वानुरूपकल्याणज्ञानक्रियाद्यपरिमेयगुणा
नन्तपरिजनपरिच्छदस्वोचितनिखिलभोग्यभोगोपकरणाद्यनन्तमहाविभववाङ्मनसगोचरस्वभावदिव्यस्था
नादिनित्यतानिरवद्यतागोचराश्च सहस्रशः श्रुतयः सन्ति वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् य एषो
न्तरादित्ये हिरण्मयः पुरुषः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी स य एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयः
अमृतो हिरण्मयः मनोमय इति मनसैव विशुद्धेन गृह्यत इत्यर्थः सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि विद्युद्वर्णात्पुरुषा
दित्यर्थः नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा मध्यस्थनीलतोयदविद्युल्लेखेव स यं दहरपुण्डरीकमध्यस्थाकाश
वर्तिनी वह्निशिखा तन्नीलतोयदविद्युदिवाभातीत्यर्थः मनोमयः प्राणशरीरो भारूपः सत्यकामः सत्यसंकल्पः आका

के

॥ अथ तस्य भयं भवति भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति एतस्याक्षरस्य प्रशा
सने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः एतस्यैवाक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसंति यजमानं देवा
दर्वीं पितरोऽन्वायत्ता इत्याद्यनेकविधाः श्रुतयः संति यथोक्तं द्रविडभाष्ये तस्याज्ञया धावति वायुर्नद्यः स्रवंति तेन
च कृतसीमानो जलाशयाः समुद्राः एवमेव विसर्पितं कुर्वीत इति तत्संकल्पनिबन्धनाऽस्मे लोकाश्च्यवंते न स्फुटंते
स्वशासनानुवर्तिनं ज्ञात्वा कारुण्यात्स भगवान् वर्धयेत तद्धि ज्ञानकं मे दद्यात् इति च परमपुरुषयाथात्म्यज्ञानपूर्वकतदु
पासनादिविहितकर्मानुष्ठायिनस्तत्प्रसादात्प्राप्तिपर्यंतानि सुखान्यभयं च यथाधिकारं भवंति तज्ज्ञानपूर्वकं तदु
पासनादिविहितं कर्माकुर्वतो निंदितानि च कुर्वतस्तन्नियमहादेवतत्प्राप्तिपूर्वकापरिमितदुःखानि भयं च भवति य
कर्मत्वं ५ थोक्तं भगवता नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः इत्यादिना कृत्स्नं कर्म ज्ञानपूर्वकमनुष्ठेयं विधाय मयि सर्वाणि क
र्माणि संन्यस्येति कर्मणः स्वाराधनतामात्मनोऽवाप्यतां च प्रतिपाद्य ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः
श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान् विद्धि नष्टा
नचेतसः इति स्वानुवर्तिनः प्रशस्य विपरीतान्निंद्य पुनरपि स्वाज्ञानुपालनमकुर्वतामासुरप्रकृतिं भावमभि
धायाधमा गतिरुक्ता तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु श्रा

वे.सा.
२९

२८

सदापश्यंतीत्येककर्तृकविषयतया प्रतीतेः श्रुतिभंगप्रसंगात् मंत्रार्थवादावगताद्यर्थाः कार्यपरत्वेपि सिध्यंतीत्युक्तं किं
पुनः सिद्धवस्तुन्यवतात्पर्ये मुत्पत्तिसिद्धिरिति सर्वमुपपन्नं ननु चात्र तद्विष्णोः परमं पदमिति परस्वरूपमेव परम
पदेनाभिधीयते समस्तहेयरहितं विष्ण्वाख्यं परमं पदमित्यादिषु व्यतिरेकदर्शनात् नैवं त्रयंतमस्य रजसः परा
के तदक्षरं परमे व्योमन् यो अस्याध्यक्षः परमे व्योमन् यो वेद निहितं गुहायां परमे व्योमन्नित्यादिषु परमस्थानस्य च प्रदर्शनात्
तद्विष्णोः परमं पदमिति प्र व्यतिरेकदर्शनाच्च विष्ण्वाख्यं परमं पदमिति विशेषणादन्यदपि परमं पदं विद्यत इति च तेनैव विज्ञा
यते तदिदं परमं स्थानं सूरिभिः सदा दृश्यत्वेन प्रतिपाद्यते एतदुक्तं भवति कचित्परमस्थानं परमशब्देन प्रतिपाद्यते कचित्स्व
रूपेति वियुक्तात्मस्वरूपं कचिद्भगवत्स्वरूपं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्यत्र परमस्थानं सर्गास्थिसंतकालेषु त्रिवि
धेव प्रवर्त्तते गुणाश्रवस्तात्परमं पदमित्यत्र भगवत्स्वरूपं त्रीण्येव एतानि परमप्राप्यत्वेन परमपदशब्देन प्रतिपाद्यंते कथं त्रयाणां
परमप्राप्यत्वमिति चेत् भगवत्स्वरूपं परमप्राप्यत्वादेव परमं पदं इतरयोरपि भगवत्प्राप्तिगर्भत्वादेव परमपदत्वं सर्व
कर्मबंधविनिर्मुक्तात्मावाप्तिर्भगवत्प्राप्तिगर्भा तद्मे सत्याः कामा अनृतापिधाना इति भगवतो गुणगणस्य तिरोधायक
त्वेनानृतशब्देन स्वकर्मणा प्रतिपादनात् अनृतरूपतिरोधानेदोक्तकर्म निकुप्र मनगम्यत इति चेत् अविद्याकर्मसंज्ञान्या
तृतीया शक्तिरिष्यते यथा क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्यतिसंततान् तया तिरोहितत्वाच्च सा
हि वचनात् परस्थानप्राप्तिरपि भगवत्प्राप्तिगर्भेति सुव्यक्तं त्रयंतमस्य रजसः पराके इति रजःशब्देन त्रिगुणात्मिका प्रकृतिरुच्यते

२९

रा आत्मा सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तो वाक्यनादरः महारजतं वासः इत्याद्याः अस्येशाना जगतो
विष्णुपत्नी श्रीश्चते लक्ष्मीश्च पत्न्यौ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः त्वयैतमत्यग्रजः पराके पद्मेकमव्यक्तमनंतरूपं॥
विश्वं पुराणं तमसः परस्तात् यो वेद निहितं गुहायां परमे व्योमन् तदेवभूतं तदु भव्यमाहुः तदक्षरे परमे व्यो
मन्नित्यादिश्रुतिशतनिश्चितोयमर्थः तद्विष्णोः परमं पदमिति विष्णोः परस्य ब्रह्मणः परमं पदं सदा पश्यन्ति सूरय इति सर्व
कालदर्शनवंतः परिपूर्णज्ञानाः केचन संति विस्तायतो ये सूरयः ते सदा पश्यंति इति वचनव्यक्तिः ये सदा पश्यन्ति ते सूर
य इति वा उभयपक्षेप्यनेकविधानं न संभवतीति चेन्न अप्राप्तत्वात्सर्वस्य सर्वविशिष्टपरमस्थाने विधीयते यथा लोके तद्गु
णास्तु विशिष्टेयरत्नविभागाद्विधानार्थेन चेदन्येन विशिष्ट इति वा यागदाग्नेयोष्टाकपाल इत्यादिकर्मविधौ कर्मणो गु
णानां चाप्राप्तत्वेन सर्वगुणविशिष्टकर्मविधीयते तथा चापि सूरिभिः सदा दृश्यत्वेन विष्णोः परमं स्थानमप्राप्तं प्र
तिपादयतीति न कश्चिद्विरोधः करणमंत्रः किंमन्नाः अनुवादिनः स्तोत्रशस्त्ररूपाः जपादिषु विनियुक्ता अध्वरेषु करणाप
ठिताश्च स्वार्थं सर्वं यथावस्थितमेव प्राप्तमविरुद्धं ब्राह्मणवद्बोधयंतीति हि वैदिकाः प्रगीतमंत्रसाध्यगुणनिष्ठ गुणाभि
धानं स्तोत्रं अप्रगीतमंत्रसाध्यगुणनिष्ठगुणाभिधानं शास्त्रं विनियुक्तार्थप्रकाशिनां च देवतादिस्वरूपाप्राप्ताविरुद्धगुण
विशेषप्रतिपादनं विनियोगानुगुणमेव ने यं स्तुतिर्मुक्तं जनविषया तेषां सदा दर्शनानुपपत्तेः नापि मुक्तप्रवाहविषया

29

रत्वात्तद्विपरीतं स्थिरत्वमेषां सत्यपदेनोच्यते सत्यसंकल्पः स्वं तेषु भोग्यतदुपकरणादिषु नित्येष्वनित्येषु च सत्स्वपि स्व
पूर्वोत्पन्नापरिमितानामर्थानामपि संकल्पमात्रेणोत्पत्तिं वदन्ति एषां च भोगोपकरणानां चेतनाचेतनानां स्थिराणा
मस्थिराणां चेतनसंकल्पायत्तस्वरूपस्थितिप्रवृत्तिभेदादिति सर्वं वदन्ति सत्यसंकल्प इति इतिहासपुराणयोर्वेदोपबृंहणयोश्चा
यमर्थः कथ्यते तेषामधावेनोदृष्टा वेदेषु परिनिष्ठितो वेदोपबृंहणार्थाय तावग्राहयत प्रभुरिति वेदोपबृंहणेन यथासार्थं श्रीमद्रामायणे व्यक्तमे
ष महायोगी परमात्मा सनातनः। अनादिमध्यनिधनो महतः परमो महान्। तमसः परमो धाता शंखचक्रगदाधरः। श्रीवत्सवक्षा नित्यश्रीरजे
यः शाश्वतो ध्रुवः। शरनामानि विधायाभ्यपिधनुरायतविग्रहं अन्वगच्छत्तं काकुत्स्थं सर्वे पुरुषविग्रहाः विवेश वैष्णवं तेजः सशरीरः सहानुगः श्रीम
द्भगवत्पुराणेऽपि समस्ताः शक्तयश्चैताः नृप यत्र प्रतिष्ठिताः तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् मूर्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिः नित्यै
वैषा जगन्माता विष्णोः श्रीरनपायिनी यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम देवत्वे देवदेहेयं मानुषत्वे च मानुषी विष्णोर्देहानुरूपां वै
करोत्येषात्मनस्तनुं एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः कलामुहूर्तादिमयश्च कालो न
यद्विभूतेः परिणामहेतुः महाभारते च दिव्यस्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यं गच्छ प्रभो रक्ष चास्मान्प्रपन्नान्कल्पे कल्पे
जायमानः स्वमूर्त्या कालो न पचते तत्र न कालस्तत्र वै प्रभुरिति परस्य ब्रह्मणो रूपवत्त्वं तत्र तत्राकारश्च वदन्ति अन्तस्तद्धर्मोपदेशादित्यास
वादित्यमण्डलान्तर्वर्तिनः प्रकाशेश्वरगिरिवरप्रभः सहस्रांशुः शतसहस्रकिरणो गम्भीराम्भः समुद्भूतसुमृष्टनालरविकरविकसितपु
ण्डरीकदलायतेक्षणः सुभ्रूललाटः सुनासः सुस्मिताधरविद्रुमः सुरुचिरकोमलगण्डः कम्बुग्रीवः समुन्नतांसविलम्बिचारुरूपदिव्यकर्णकिस
लयः पीनवृत्तायतभुजश्चारुतरताम्रकरतलानुरक्ताङ्गुलिभिरलंकृतस्तनुमध्यो विशालवक्षस्थलः समविभक्तसर्वाङ्गोऽनिर्देश्यदिव्यरूप
संहननः स्निग्धवर्णः प्रबुद्धपुण्डरीकचारुचरणयुगलः स्वानुरूपपीताम्बरधरोऽमलकिरीटकुण्डलहारकौस्तुभकेयूरकटकनूपुरोदरबन्ध

स ३

केवलस्य रजसोऽनवस्थानात् इमां त्रिगुणात्मिकां प्रकृतिमतिक्रम्य स्थिते स्थाने ह्ययं तं वसंतमित्यर्थः अनेन त्रिगुणात्मिकात्तसो
त्रेवस्य भोग्यभूतात् वस्तुनः परस्माद्धि सोऽर्वा संस्थानमिति गम्यते वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तादित्य
त्रापि तमःशब्देन सैव प्रकृतिरुच्यते केवलस्य तमसोऽनवस्थानादेव रजसः पराके त्वयन्तमित्यनेनैकवाक्यत्वात्तमसः परस्ता
द्वसंतं महान्तमादित्यवर्णं पुरुषमहं वेदेत्ययमर्थो विगम्यते सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्निति तत्
स्थानमविकाररूपं परमव्योमशब्दाभिधेयमिति च गम्यते अत्र हि परमे व्योमन्नित्यस्य स्थानस्यादरत्वश्रवणात् स्वरूपा
दित्यमंडलाद्यान परमशब्दाभिधेयाः यत्र पूर्वे साध्याः सन्ति देवाः यत्रर्षयः प्रथमजा ये पुराणाः इत्यादिषु चत एव सूरय इत्यवगम्य
९५ ते तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदमित्यत्रापि विप्रासः मेधाविनः विपन्यवः स्तुतिशीलाः जागृवांसः
अस्खलितज्ञानाः त एवास्खलितविज्ञानाः विष्णोः परमं पदं सदा स्तुवंतस्समिन्धत इत्यर्थः एतेषां पहिजनस्थानादीनां सदेवसो
म्येदमग्र आसीदित्यत्र ज्ञानबलैश्वर्यादिकल्याणगुणवत्परब्रह्मस्वरूपान्तर्गतत्वात् सदेवैकमेवाद्वितीयमिति प्रमाणाभावोवग
म्यते एषामपि कल्याणगुणैकदेशत्वादेव सदेव सोम्येदमग्र आसीदित्यत्रैकमितित्वादस्य कर्मवश्यभोक्तृवर्गमिश्रतद्भोग्यभूतप्रं
चाविषयत्वाच्च सदा पश्यन्ति सूरय इति सदादर्शित्वेन चैतेषां कर्मवश्यानंतभोगात् अपहतपाप्मेत्याद्यपिपास इत्यन्तेन सर्वलीलो
पकरणभूतत्रिगुणात्मकप्रकृतिप्राकृतसंसृष्टपुरुषगतहेयस्वभावं सर्वं प्रतिषिध्य सत्यकाम इत्यनेन स्वभोग्यभोगोपकरण
जातस्य सर्वस्य सत्ताप्रतिपादिताः सत्याः कामाः यस्यासौ सत्यकामः काम्यन्त इति कामाः तेन परब्रह्मणा स्वभोग्यतदुपकरणादयः
स्वाभिमताश्च काम्यन्ते ते सत्या नित्या इत्यर्थः अन्यस्य लीलोपकरणस्यापि वस्तुनः प्रमाणसंबंधयोग्यत्वे सत्यपि विकारास्पदत्वेनास्थि

ते ३

नापत्तीपरिज्ञनस्यानादीनां निर्देशाद्देवर्षिन्तस्यैवगम्यते यथाह भाष्यकारः यथाभूतमादिष्टिश्चास्त्रमिति एतदुक्तं भवति यथा सर्वज्ञानमनंतं
ब्रह्मेति निर्देशात्परमात्मस्वरूपं समस्तहेयप्रत्यनीकानवधिकानंदैकतानतयाऽपरिच्छिन्नतया च सकलेतरविलक्षणं तथायः सर्वज्ञः सर्ववित्
परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिनिर्देशान्निरतिशया
संख्येयाश्च गुणास्सकलेतरविलक्षणाः तथाऽऽदित्यवर्णमित्यादिनिर्देशात्तद्रूपपरिज्ञानस्यानादयश्च सकलेतरविलक्षणाः स्वासाधार
30 णाह निर्देश्यस्वरूपस्वभावा इति वेदाः प्रमाणं चेद्विध्यर्थवादमन्त्रगतं सर्वं अपूर्वमतिरूढमर्थजातं यथावस्थितमेव बोधयन्ति प्रामाण्यं चवे
दानामौत्पत्तिके औत्पत्तिकस्तु शब्दस्यार्थेन संबंध इत्युक्तं यथाग्निजलादीनामौष्ण्यादिशक्तियोगः स्वाभाविकः यथा चक्षुरादीनामिंद्रियाणां बुद्धि
विशेषजननशक्तिः स्वाभाविकी तथा शब्दस्यापि बोधनशक्तिः स्वाभाविकी न च हस्तचेष्टादिवत्संकेतमूलं शब्दस्य बोधकत्वमिति वक्तुं युक्तं
अग्नाद्यनुसंधानाविच्छेदेऽपि संकेतयितृपुरुषाज्ञानात् यानि संकेतमूलानि तानि सर्वाणि प्रमाणान्तरपरतया ज्ञायन्ते न च देवदत्तादिशब्दवत्संकेत
यितृपुरुषं तेषु साक्षात्परंपरया वा संकेतोऽध्यवसीयते गवादिशब्दानां त्वेवानुसंधानाविच्छेदे संकेतयितृज्ञानादेव बोधकत्वशक्तिः स्वाभाविकीत्य
क्षादीनां ग्राहकत्वशक्तिवदिंद्रियाणां बोधकत्वशक्तिवच्च शब्दस्यापि बोधकत्वशक्तिरास्थेया प्रागुक्तं हि तत्संबंधस्य बोधकत्वदर्शनाद्य
नुसंधानाविच्छेदेऽपि संकेताज्ञानाद्बोधकत्वशक्तिरेवेति निश्चीयते एवं बोधकानां पदसंघातानां संसर्गविशेषबोधकत्वेन वाक्यशब्दाभिधेयानामु॥
च्चारणक्रमजनितसंस्कारपूर्वकः सर्वदा पौरुषेयास्ते च वेदा उच्यन्ते एतदेव वेदानामपौरुषेयत्वं नित्यत्वं च यत्पूर्वपूर्वोच्चारणक्रमजनितसं
स्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वं ते चानुपूर्वीविशेषेण संस्थिता अक्षरराशयो वेदा ऋग्यजुःसामाथर्वभेद
भिन्ना अनंतशाखा वर्तन्ते ते च विध्यर्थवादमन्त्ररूपा वेदाः परब्रह्मनाराधनस्वरूपं तदाराधनप्रकारं आराधितात्फल
विशेषं च बोधयन्ति परमपुरुषवत्तत्स्वरूपतदाराधनतत्फलज्ञानबीजं वेदाख्यं शब्दजातं नित्यमेव वेदानामनंतत्वादुरवगाहत्वाच्च परमपु

नाद्यपरिमिताश्चर्यानंतदिव्यभूषणः शंखचक्रगदासिशार्ङ्ग श्रीवत्सवनमालालंकृतो नवधिकातिशयसौंदर्य्याहृताशेषमनोदृष्टिवृत्तिर्ला
वण्यामृतपूरिताशेषचराचरभूतजातो त्यद्भुताचिंत्यनित्ययौवनः पुष्पहाससुकुमारः पुण्यगंधवासितानंतदिगंतरालस्त्रैलोक्याक्र
मणप्रवृत्तगंभीरभावः करुणानुरागमधुरलोचनावलोकिताश्रितवर्गः पुरुषवरो दृश्यते स च निखिलजगदुदयविभवलीलानि
रस्तसमस्तहेयः स्वेतरसमस्तवस्तुविलक्षणानंतमस्तकल्याणनिधिः परमात्मा परं ब्रह्म नारायणोऽयमवगम्यते तद्धर्मोपदेशात् स एष सर्व
लोकानामीष्टे सर्वलोकामानामेष सर्वेभ्यः पाप्मभ्यः उदित इत्यादिदर्शनात् तस्यैते गुणाः सर्वस्येशानः अपहतपाप्मा विरज इत्यादि सत्यसंक
ल्प इत्यन्तं विश्वतः परं नित्यं विश्वं नारायणं हरिं पतिं विश्वस्यात्मेश्वरमित्यादिवाक्यप्रतिपादिताः वाक्यकारश्चैतत्सर्वमाह हिरण्मयः
पुरुषो दृश्यत इति प्राज्ञः सर्वान्तरः स्याल्लोककामेशोपदेशात् तथोदयात्पाप्मनामित्यादिना तस्य च रूपस्यानित्यतादि वाक्यकारेणैव
प्रतिषिध्य स्यात्तद्रूपं कृतकमनुग्रहार्थम् तच्चेतनानामैश्वर्य्यादिति उपासितुरनुग्रहार्थः परमपुरुषस्य रूपसंग्रह इति पूर्वपक्षं कृत्वा रूपं
श्री चानीन्द्रियमन्तःकरणप्रत्यक्षं तन्निर्देशादिति यथाह सः परस्य ब्रह्मणः स्वरूपतया निर्दिष्टज्ञानस्वरूपभूतगुणाः तथेदमपि रूपमस्य
स्वरूपतया निर्देशात् स्वरूपभूतमित्यर्थः भाष्यकारेणैतद्व्याख्यातं अत्र क्षेत्र विग्रहसंज्ञो रूपं तेन तु न चक्षुषा ग्राह्यं मनसा त्वकलुषेण साध
नान्तरवता गृह्यते न चक्षुषा गृह्यते नापि वाचा मनसा तु विशुद्धेनेति श्रुतेः न ह्यरूपाया देवताया रूपमुपदिश्यते यथाभूतवादि हि शा
स्त्रम् महारजतं वासः वेदाहमेतं पुरुषं महान्तमिति प्रकरणान्तरनिर्देशात् साक्षिणः इत्यादिना हिरण्मय इति रूपसामान्याच्चन्द्रमुखवत्
नमेतत्त्रविकारमादाय प्रयुज्यते अनारभ्यत्वादात्मन इति यथोक्तानादिकल्याणगुणानन्तस्य निर्देशादपरिमितकल्याणगुणविशिष्टं ब्र
६३ ह्येत्यवगम्यते एवमादित्यवर्णं पुरुषमित्यादिनिर्देशात्तद्याभिमतस्वानुरूपकल्याणतमरूपः परं ब्रह्मभूतः पुरुषोत्तमो नारायण इति श्रिया
यते यथा स्थिता नाजगतो विष्णुपत्नी श्रीश्च ते लक्ष्मीश्च पत्न्यौ सदा पश्यन्ति सूरयः तमसः परस्तात् क्षयन्तमस्य रजसः पराक इत्यादि

मोनुगृहीतभक्तिनिष्पाद्यं ध्यानवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपपरभक्तिरेवेत्युक्तं भक्तिशब्दश्च प्रीतिविशेषे प्रवर्त्तते प्रीतिश्च ज्ञा
नविशेष एव ननु च सुखं प्रीतिरित्यर्थान्तरं सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरमिति हि लौकिकाः नैवं येन ज्ञानविशेषेण तत्साध्यमित्युच्यते
स एव ज्ञानविशेषः सुखं एतदुक्तं भवति विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि तानि च विषयाधीनविशेषाणि तथा भवंति येन च
विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्यभिमतं तद्विषयं ज्ञानमेव सुखं तदतिरेकि पदार्थान्तरं नोपलभ्यते तेनैव सुखत्वव्यवहा
रोपपत्तेश्च एवंविधसुखरूपज्ञानस्य विशेषकत्वं ब्रह्मव्यतिरिक्तस्य वस्तुनः सातिशयमस्थिरं च ब्रह्मणस्त्वनवधिकातिशयं स्थिरं चेति
आनंदो ब्रह्मेत्युच्यते विषयायत्तत्वाद् ज्ञानस्य सुखरूपतायाः ब्रह्मैव सुखं तदिदमाह रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति ब्रह्मैव सु
खं ब्रह्म लब्ध्वा सुखी भवतीत्यर्थः परमपुरुषः स्वेनैव स्वयमनवधिकातिशयसुखस्सन् परस्यापि सुखं भवति सुखरूपत्वाविशे
षात् ब्रह्म यस्य ज्ञानविषयो भवति स सुखी भवतीत्यर्थः तदेवं परस्य ब्रह्मणोऽनवधिकातिशयासंख्येयकल्याणगुणाकरस्य निरवद्यस्या
नंतमहाविभूतेरनवधिकातिशयसौशील्यसौंदर्यवात्सल्यजलधेः सर्वशेषित्वादात्मनः शेषत्वप्रतिसंबंधितयानुसंधीयमानम
नवधिकातिशयप्रीतिविषयभूतं सत्परब्रह्मैवैनमात्मानं प्रापयतीति ननु चात्यंतशेषतैवात्मनोऽनवधिकातिशयसुखमित्युक्तं भवति
तदेतत्सर्वलोकविरुद्धं तथा हि सर्वेषामेव चेतनानां स्वातंत्र्यमेवेष्टतमं दृश्यते पारतंत्र्यं दुःखतरं स्मृतिश्च सर्वं परवशं दुःखं सर्वमात्मवशं
सुखं तथा च सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेदिति तदिदमनधिगतदेहातिरिक्तात्मस्वरूपाणां शरीरात्माभिमानविजृंभितं
तथाहि शरीरं हि मनुष्यत्वादिजातिगुणाश्रयपिंडभूतं स्वतंत्रं प्रतीयते तस्मिन्नहमिति संसारिणां प्रतीतिः आत्माभिमानो यादृशः तदनु
गुणैव पुरुषार्थप्रतीतिः सिंहव्याघ्रवराहमनुष्ययक्षरक्षःपिशाचदेवदानवस्त्रीपुंसव्यवस्थितात्माभिमानानां सुखानि व्यवस्थितानि तानि च
परस्परविरुद्धानि तस्मादात्माभिमानानुगुणपुरुषार्थव्यवस्थया सर्वं समाहितं आत्मस्वरूपं तु देवादिदेहविलक्षणं ज्ञानैकाकारं तच्च
परशेषतैकस्वरूपं यथावस्थितात्माभिमाने तदनुगुणैव पुरुषार्थप्रतीतिः आत्मा ज्ञानमयोऽमलः इति स्मृते ज्ञानैकाकारता वप्रति

षिभिरुक्ताः परमर्षयः वेदार्थं कल्पे कल्पे जगदुपकारार्थं स्मृत्वा विध्यर्थवादमंत्रमूलानि धर्मशास्त्राणीतिहासपुराणानि चक्रुः लौकि
काश्च शब्दा वेदराशेरुद्धृत्य सैव तत्तदर्थविशेषज्ञातया पूर्ववत्प्रयुक्ताः पारंपर्येण प्रयुज्यन्ते ननु च वैदिका एव सर्वे वाचकाः शब्दाश्चे
दस्येवं भाषायामेवमिति लक्षणभेदः कथमुपपद्यते उच्यते तथामेव शब्दानां तस्यामेवानुपूर्व्यां वर्त्तमानानां तथैव प्रयोगः अन्यत्र प्रयुज्यमा
नानामन्यथेति न कश्चिद्दोषः एवमितिहासपुराणधर्मशास्त्रोपबृंहितसांगवेदवेद्यः परब्रह्मभूतनारायणो निखिलहेयप्रत्यनीकः सकले
तरविलक्षणोपरिच्छिन्नज्ञानानंदस्वरूपः स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणाकरः स्वसंकल्पानुविधायिस्वरूपसंस्थि
तिप्रवृत्तिभेदचिदचिद्वस्तुजातोपरिमितस्वरूपस्वभावानंतविभूतिर्नानाविधानंतचेतनाचेतनात्मकप्रपंचलीलोपकरण इति प्रतिपादितं सर्व
खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वं तत्त्वमसि श्वेतकेतो एतमेके वदन्त्यग्निं मरुतोन्ये प्रजापतिमिन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतं ज्योतींषि शुक्लानि
च यानि लोके त्रयो लोकाः लोकपालास्त्रयी च त्रयोग्नयः पंचाहुतयश्च पंच सर्वे देवा देवकीपुत्र एव त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परंतपः ऋतुधामा वसुः
सु पूर्वं वसूनां त्वं प्रजापतिः जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलं अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि वि
ष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य इत्यादिसामानाधिकरण्यप्रयोगः सर्वैः शब्दैः स्ववेदशरीरतया सर्वप्रकारं
वृत्ते वाभिधीयत इति चोक्तं सत्यसंकल्पं परं ब्रह्म स्वयमेव बहुप्रकारं स्यामिति संकल्प्याचित्समष्टिरूपमहाभूतसूक्ष्मवस्तु भोक्तृवर्गसमूहं च स्व
स्मिन् लीनं स्वयमेव विभज्य तस्माद्भूतसूक्ष्माद्वस्तुनो महाभूतानि सृष्ट्वा तेषु च भोक्तृवर्गमात्मतया प्रविश्य तैश्चेतनाधिष्ठितैर्महाभूतैरन्यो
न्यं संसृज्य कृत्स्नं जगद्विधाय स्वयमपि सर्वस्यात्मतया प्रविश्य परमात्मत्वेनावस्थितं सर्वशरीरं बहुप्रकारमवतिष्ठते यदिदं महाभूतसूक्ष्मव
स्तु तदेव प्रकृतिशब्देनाभिधीयते भोक्तृवर्गसमूह एव पुरुषशब्देनोच्यते तौ च प्रकृतिपुरुषौ परमात्मशरीरतया परमात्मप्रकारभूतौ तत्प्र
कारः परमात्मैव प्रकृतिपुरुषशब्दाभिधेयः सोकामयत बहु स्यां प्रजायेयेति स तपस्तप्त्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानि
रुक्तं च निलयनं च विज्ञानं च सत्यं चानृतं च सत्यमभवदिति पूर्वोक्तं सर्वमनयैव श्रुत्याव्यक्तं ब्रह्मप्राप्त्युपायश्च शास्त्राधिगतज्ञानपूर्वकस्वक

तत्त्वतो भगवत्प्राप्तिसाधनं यथोक्तं भगवता द्वैपायनेन मोक्षधर्मे सर्वोपनिषद्व्याख्यानरूपं भगवद्दर्शनेन न संदृशे तिष्ठति रूपमस्य न च
क्षुषा पश्यति कश्चनैनं भक्त्या च धृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं पश्यति साक्षात्क
रोतीत्यर्थः भक्त्या त्वनन्यया शक्यस्त्वनेनैकार्थ्यात् भक्तिश्च ज्ञानविशेष एवेति सर्वमुपपन्नं सारासारविवेकज्ञा गरीयांसो विमत्सराः
प्रमाणतन्त्राः संतीति कृतो वेदार्थसंग्रहः ॥ॐ॥ इति श्रीभगवद्रामानुजाचार्यविरचितो वेदार्थसंग्रहः समाप्तः श्रीअनंतपुरुषोत्तमस्येदं पुस्तकं

33 पन्नापतिं विश्वस्येत्यादिश्रुतिगणैः परमात्मशेषतैकाकारता च प्रतीतिः अतः सिंहव्याघ्रादिशरीराभिमानवत् स्वतंत्राभिमानो
पि कर्मकृतविपरीताभिमानरूपो वेदितव्यः अतः कर्मकृतमेव परमपुरुषव्यतिरिक्तविषयाणां सुखत्वमत एवैतेषामल्पत्वमस्थि
रत्वं च परमपुरुषस्यैव स्वत एव सुखत्वं अतस्तदेव स्थिरमनवधिकातिशयं च कं ब्रह्म खं ब्रह्म आनंदो ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतिः ॥
व्यतिरिक्तस्य कृत्स्नवस्तुनः स्वरूपेण सुखत्वाभावः कर्मकृतत्वेन चास्थिरत्वं भगवता पराशरेणोक्तं नरकस्वर्गसंज्ञे वै पापपुण्ये
द्विजोत्तम वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः सुखदुःखा ह्येकान्तरूपेण वस्तुनो
वस्तुत्वं कुतः तदेकान्तता पुण्यपापफलत्वे त्वर्थः एवमनेकपुरुषापेक्षया कस्यचित्सुखमेव कस्यचिद्दुःखं भवतीति कथं स्यात् प्रतिपाद्य
सि एकान्तपि पुरुषे न व्यवस्थितमित्याह तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते तदेव कोपाय यतः प्रसादाय च जायते तस्माद्दुःखात्म
त कं नास्ति न च किंचित्सुखात्मकमिति सुखदुःखात्मकत्वं सर्वस्य वस्तुनः कर्मकृतं न वस्तुस्वरूपकृतं अतः कर्मावसाने तदवैतीत्यर्थः
यत्तु सर्वं परवशं दुःखमित्युक्तं तत्परमपुरुषव्यतिरिक्तानां परस्परशेषशेषिभावाभावात् तद्व्यतिरिक्तं प्रतिशेषतां दुःखमेवेत्युक्तं सेवा
श्ववृत्तिर्व्याख्याता तस्य शाश्वतस्य सेवा श्ववृत्तिरेवेत्युक्तं सहाश्रमैस्सदा ये व्यसमस्तैरक एव त्विति सर्वैरात्मयाथात्म्यवेदिभिः सेव्यः पुरुषो
त्तम एक एव यथोक्तं भगवता मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते इतीयमेव भ
क्तिरूपा सेवा ब्रह्मविद्याप्तिपरं तमेवं विद्वानमृत इह भवति ब्रह्मवेद ब्रह्मैव भवतीत्यादिषु वेदनशब्देनाभिधीयते उक्तं यमेवैष वृ
णुते तेन लभ्य इति विशेषणात् यमेवैष वृणुत इति भगवता वरणीयत्वं प्रतीयते वरणीयश्च प्रियतमः यस्य भगवत्यनवधिकाति
शया प्रीतिर्जायते स एव भगवतः प्रियतमः तदुक्तं भगवता प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति तस्माद्भक्तिरूपापन्नमेव वेदनं